27

कायमत्री

ਗਿਆਨ

Acc No 27

Digitized by Panjab Digital Library | www.panjabdigilib.org

क्रम-संख्या 27

ग्रन्थ-नाम कादम्बरी

ग्रन्थकर्त्ता बाणभट्ट

विषय काव्य

लिपि देवनागरी

पत्र-संख्या २३८

पत्र-प्रमाण ३१.१ × ११.७ सि॰ मि॰

पंक्तियां ८

अक्षर ६०

पाठ-संख्या ~~३५७०~~ ७१४०

पूर्ण/अपूर्ण

प्रारम्भ :—

Digitized by Panjab Digital Library | www.panjabdigilib.org

18

कादम्बरी

पुस्तक श्रीहू को ~~बाखवदस्तां~~

Acc

Digitized by Panjab Digital Library | www.panjabdigilib.org

॥ ॥ श्रीगणेशायनमः ॥ ॥ रजोजुषेजन्मनिसत्ववृत्तयेस्थितौप्रजानांप्रलयेतमस्पृशेअजायसर्गस्थितिनाशहेतवेत्रयीमयायत्रि
गुणात्मनेनमः ॥ १ ॥ आसीदशेषनरपतिशिरःसमभ्यर्चितशासनःपाकशासनइवापरश्चतुरुदधिमालामेखलायाभुवोभर्त्ताप्र
तापानुरागावनतसमस्तसामंतचक्रश्चक्रवर्त्तिलक्षणोपेतश्चक्रधरइवकरकमलोपलक्ष्यमाणशंखचक्रलांछनोहरइवजित
मन्मथोगुहइवाप्रतिहतशक्तिःकमलयोनिरिवविमानीकृतराजहंसमंडलोजलधिरिवलक्ष्मीप्रसूतिर्गंगाप्रवाहइवभगीरथ
पथप्रवृत्तोरविरिवप्रतिदिवसोपजायमानोदयोमेरुरिवसकलउपजीव्यमानपादछायोदिग्गजइवानवरतप्रवृत्तदा
दानार्द्रीतकरः २ नार्द्रीकृतकरःकर्त्तामहाश्चर्याणामाहर्त्ताक्रतूनामादर्शःसर्वशास्त्राणामुत्पत्तिःकलानांकुलभवनंगुणानामागमःकाव्यामृत राम
रसानामुदयशैलोमित्रमंडलस्यउत्पातकेतुरहितजनस्यप्रवर्त्तयितागोष्ठीबंधानामाश्रयोरसिकानांप्रत्यादेशोधनुष्मतांधौरे १

Digitized by Panjab Digital Library | www.panjabdigilib.org

यःसाहसिकानामग्रणीर्विदग्धानांवैनतेयइवविनतानंदजननोवैन्यइवचापकोटिसमुत्सारितसकलारातिकुलाचलोराजा
शूद्रकोनामानाम्नैवयोनिर्जितारातिहृदयोविरचितनरसिंहरूपाडंबरमेकविक्रमाक्रांतसकलभुवनतलोविक्रमयासितंवज
हासेववासुदेवमतिचिरकाललग्नमतिक्रांतअश्वपतिसहस्रसंपर्ककलंकमिवक्षालयंतीयस्यकृपाणधाराजलेचिरमुवासराजल
क्ष्मीः॥यश्चमनसिधर्मेणकोपेयमेनप्रसादेधनदेनप्रतापेवह्निनाभुजेभुवाहशिश्रियावाचिसरस्वत्यामुखेशशिनाबलेमरुताप्र
ज्ञायांसुरगुरुणारूपेमनसिजेनतेजसिसविताचवसतासर्वदेवमयस्यप्रकटितविश्वरूपाकृतेरनुकरोतिभगवतोनारायणस्यचमदक
लकरिकुंभपीठपाटनमाचरतालग्नस्थूलमुक्ताफलेनहटस्थिनिपीडनानिष्ठुरतयाराजलविंडदंतुरेणोवकृपाणेनाकृष्यमाणाशिल
मीरःकपाटघटितकवचसहस्रांधकारमध्यवर्त्तिनीकरिकरटतटगलितमदजलासारदुर्दिनाश्वालिसारिकेवसमरनिशासुसमीपम
सकृदाजगामराजलक्ष्मीः॥यस्यचहृदयस्थितानपिपतीनरिदिधिक्षुरिवप्रतापानलोवियोगिनीनामपिरिपुसुंदरीणामंतर्जनितदाहो

Digitized by Panjab Digital Library | www.panjabdigilib.org

दिवानिशंजनतानायस्मिंश्चराजनिजितजगतिपरिपालयतिमहींचित्रकर्म्मसुवर्णसंकराः।रतेषुकेशग्रहाः।काव्येषुदृढबंधाः।शास्त्रे
षुचिंतास्वप्नेषुविप्रलंभाः।छत्रेषुकनकदंडाः।ध्वजेषुप्रकंपाः।गीतेषुरागविलसितानिकरिषुमदविकाराः।चापेषुगुणच्छेदाः।गवाक्षेषुजाल
मार्गाः।शशिकृपाणकवचेषुकलंकाः।रतिकलहेषुदूतसंप्रेषणानिशारिषुशून्यगृहाः।प्रजानामासीत्।यस्यचपरलोकाद्भयम्।अंतःपुरि
कालकेषुभंगोनूपुरेषुमुखरतादिवाहेषुकरग्रहणंअनवरतमखाग्निधूमेनाश्रुपातः।तुरगेषुकशाभिघातोमकरध्वजेचापध्वनि
रभूत्।तस्यचराज्ञःकलिकालभयपुंजीभूतकृतयुगानुकारिणीत्रिभुवनप्रसवभूमिरिवविस्तीर्णामज्जनासवविलासिनीकुचतटास्फा
लनजर्जरितोर्म्मिमालयाजलावगाहनावतीर्णजयकुंजरकुंभसिंदूरसंध्यायमानसलिलयोन्मदकलहंसकुलकोलाहलमुखरितकूल
यावेत्रवत्यापरिगताविदिशाभिधानानगरीराजधान्यासीत्।सतस्यामावर्जिताशेषभुवनमंडलतयाविगतराज्यचिंताभारनिर्वृतोद्वीपां राम
तरागतानेकभूमिपालमौलिमालालालितचरणयुगलोवलयमिवलीलयाभुजेनभुवनभारमुद्वहन्नमरगुरुमपिप्रज्ञयोपहसद्भिरने २

न

कुलक्रमागतैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोविद्यालंकारैरनेकमू
र्द्धाभिषिक्तपार्थिवकुलोद्भूतैरखिलकलाकलापालोचनकठोरमतिभिः प्रगल्भैः कालविद्भिः प्रभावानुरक्तहृदयैरग्राम्यपरिहासकुशलै
रिंगिताकारवेदिभिः काव्यनाटकाख्यानकालेख्यव्याख्यानादिक्रियानिपुणैरतिकठिनपीवरस्कंधोरुबाहुभिरसकृदवदलितसमदरि
पुगजघटापीठबंधैः केसरिकिशोरकैरिव विक्रमैकरसैरपि विनयव्यवहारिभिरात्मनः प्रतिबिंबैरिव राजपुत्रैः सह रममाणः प्रथ[illegible]मेव
यसि सुखमतिचिरमुवास। तस्य चातिविजिगीषुतया महासत्वतया च तृणमिव लघुवृत्ति स्त्रैणमाकलयतः प्रथमे वयसि वर्त्तमानस्यापि
रूपवतोपि संतानार्थिभिरमात्यैरपेक्षितस्यापि सुरतसुखस्योपरि द्वेष इवासीत्। सत्यपि रूपविलासोपहसितरतिविभ्रमे लावण्यवति।
विनयवत्यन्वयवति हृदयहारिणि सावरोधजने कदाचिदनवरतदोलायमानरत्नवलयो घर्घरिकास्फालनप्रकंपमुखरायमाणमणिक ऊमार
र्णाभरणः स्वयमारब्धमृदंगवाद्यः संगीतकप्रसंगेन कदाचिदविरलविमुक्तशरासारशून्यीकृतकाननो मृगयाव्यापारेण कदाचिदाबद्धविदग्ध

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं
३

मंडलः काव्यप्रबंधरचनेन। कदाचिच्छास्त्रालापेन कदाचिदाख्यानकाख्यायिकेतिहासपुराणाकर्णनेन। कदाचिदालेख्यविनोदेन। कदा
चिद्वीणया। कदाचिद्दर्शनागतमुनिजनचरणशुश्रूषया। कदाचिदक्षरच्युतकमात्राच्युतकबिंदुमतीगूढचतुर्थपादप्रहेलिकाप्रदाना
दिभिर्वनितासंभोगसुखपराङ्मुखः सुहृत्परिवृतो दिवसमनयत्। यथैव च दिवसमेवमारब्धविविधक्रीडापरिहासचतुरैः सुहृद्भिरुपेतो।
निशामप्यनैषीत्। एकदा तु नातिदूरोदिते नवनलिनदलसंपुटभिदि किंचिदुन्मुक्तपाटलिम्नि भगवति सहस्रमरीचिमालिनि राजानमा
स्थानमंडपगतमंगनाजनविरुद्धेन वामपार्श्वावलंबिना कौक्षेयकेन सन्निहितविषधरेव चंदनलता भीषणरमणीयाकृतिरविर ल।
चंदनानुलेपनधवलितस्तनतटोन्मग्नैरावतकुंभमंडलेव मंदाकिनी चूडामणिप्रतिबिंबछलेन राजाज्ञेव मूर्तिमती राजभिः शिरोभिरुह्यमा
ना शरदिव कलहंसधवलांबरा जामदग्न्यपरशुधारेव वशीकृतसकलराजमंडला विंध्यवनभूमिरिव वेत्रलतावती। राज्याधिदेवतेव विग्र राम
हिणी प्रतिहारी समुपसृत्य क्षितितलनिहितजानुकरकमला सविनयमब्रवीत्। देव द्वारस्थिता सुरलोकमारोहतस्त्रिशंकोरिव कुपितश ३

Digitized by Panjab Digital Library | www.panjabdigilib.org

तमखंडंकारनिपातिताराजलक्ष्मीरिवदक्षिणापथादागताचंडालकन्यकापंजरस्थंशुकमादायदेवंविज्ञपयति।सकलभुवनतलस
र्वरत्नानामुदधिरिवैकभाजनंदेवोविहंगमश्चायमाश्चर्यभूतःसकलनिखिलभुवनतलरत्नमितिकृत्वादेवदेवपादमूलमादायाग
ताहमिच्छामिदेवदर्शनसुखमनुभवितुमित्येतदाकर्ण्यदेवःप्रमाणमित्युक्त्वाविरराम।उपजातकुतूहलश्चराजासमीपवर्त्तिनां
राज्ञामालोक्यकोदोषःप्रवेश्यतामित्यादिदेश।अथप्रतीहारीनरपतिवचनानंतरमुत्थायतांमातंगकुमारींप्रावेशयत्॥
प्रविश्यचसानरपतिसहस्रमध्यवर्त्तिनमशनिभयपुंजितकुलशैलमध्यगतमिवकनकशिखरिणमनेकरत्नाभरणकिरणजालकां
तरितावयवमिंद्रायुधसहस्रसंछादिताष्टदिशागमिवजलधरसमयदिवसमवलंबितस्थूलमुक्ताकलापस्यकनकशृंखलानियमि
तमणिदंडिकाचतुष्टयस्यगगनसिंधुफेनपटलपांडुरस्यनातिमहतोदुकूलवितानस्याधस्तादिंदुकांतमणिपर्यंकिकानिष
ण्णमुद्धूयमानकनकदंडचामरकलापमुन्मयूखमुखकांतिविजयपराभवप्रणतेशशिनीवस्फाटिकपादपीठेविन्यस्तवामपादमिंदुनी

कादं ५ लमणिकुट्टिमप्रभासंपर्कश्यामायमानैःप्रणतरिपुनिःश्वाससमलिनीकृतैरिवचरणनखमयूखजालकैरुपशोभमानमासनो
ल्लसितपद्मरागकिरणपाटलीकृतेनाचिरमृदितमधुकैटभरुधिरारुणेनेवहरिमिवोरुयुगलेनविराजमानममृतफेनधवलेगोरो
चनालिखितहंसमिथुनसनाथपर्यंतेचामरपवनप्रनर्तितान्तदेशेदुकूलेवसानमतिसुरभिचंदनानुलेपनधवलितोरस्थलमुप
रिविन्यस्तकुंकुमस्थासकमंतरांतरानिपतितबालातपछेदमिवकैलासशिखरिणमपरशशिशंकयानक्षत्रमालयेवहारलतया
कृतमुखपरिवेषमतिचपलराजलक्ष्मीवंधननिगडकटकशंकामुपजनयतेंद्रनीलकेयूरयुगलेनमलयजरसगंधलुब्धेनभुजंगद्व
येनेववेष्टितबाहुशिखरमीषदालंबिकर्णोत्पलमुन्नतघोणमुत्फुल्लपुंडरीकलोचनममलकलधौतपट्टायतमष्टमीचंद्रशकला
कारमशेषभुवनराज्याभिषेकसलिलपूतमूर्णासनाथंललाटदेशमुद्वहंतमामोदितमालतीकुसुमशेखरमुषसिपर्यस्ततारकापुंज राम
मिवपश्चिमाचलमाभरणप्रभापिशंगितांगतयालब्धहरहुताशमिवमकरध्वजमासन्नवर्त्तिनीभिःसर्वतःसेवासंगताभिरिवदिग्वधूभि ५

Digitized by Panjab Digital Library | www.panjabdigilib.org

वीरविलासिनीभिःपरिवृतमंतमणिकुट्टिमसंक्रांतसकलदेहप्रतिबिंबतयापतिप्रेम्णावसुंधरयाहृदयेनेवोह्यमानमशेषजनभोग्य
तामुपनीतयाप्यसाधारणयाराजलक्ष्म्यासमालिंगितम परिमितपरिवारमप्यद्वितीयमनंतगजतुरगसाधनमपिखड्गमात्रसहाय
मेकदेशस्थितमपिव्याप्तभुवनमंडलंमासनगतमपिधनुषिनिषण्णमुत्सादिताशेषद्विषदिंधनमपिज्वलत्प्रतापानलमायतलोचनम
पिसूक्ष्मदर्शनंमहादोषमपिसकलगुणाधिष्ठानंकुपतिमपिकलत्रवल्लभमविरतप्रवृत्तदानमप्यमदमतिशुद्धस्वभावमपिकृष्णचरित
मकरमपिहस्तस्थितसकलभुवनतलंराजानमद्राक्षीत।आलोक्यचसादूरस्थितैवप्रचलितरत्नवलयेनरक्तकुवलयदलकोमलेनपाणि
नाजर्जरितमुखलतागांवेणुलतामादायनरपतिप्रतिबोधनार्थंसकृत्सभाकुट्टिममाजघानयेनसकलमेवतद्राजकमेकपदेवनकरियूथ
मिवतालशब्देनतेनवेणुलताध्वनिनायुगपदावलितवदनमवनिपालमुखादाकृष्यचक्षुःप्रतिहारमासीत।अवनिपतिस्तुदूरादालो
कयेत्यभिधायप्रतीहारीनिर्दिश्यमानांतांवयःपरिणामपांडुरशिरसमारक्तराजीवेक्षणापांगेनानवरतकृतव्यायामतयायौवनापगमेप्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

शिथिलशरीरसंधिनामत्यपिमातंगत्वेनातिनृशंसाकृतिनानुगृहीतार्यवेषेणधवलवाससापुरुषेणाधिष्ठितामाकुलाकुलकाक
पक्षधारिणाकनकशलाकानिर्मितमप्यंतरगतशुकप्रभाश्यामायमानंमरकतमयमिवपंजरमुद्वहताचंडालदारकेणानुगम्यमाना
मसुरगृहीतामृतापहरणकृतकपटपटुविलासिनीवेषस्यश्यामतयाभगवतोहरेरिवानुकुर्वतींसंचारिणीमिवेंद्रनीलमणिपुत्रिकामा
गुल्फावलंबिनानीलकंचुकेनावच्छन्नशरीरामुपरिरक्तांशुकरचितावगुंठनांनीलोत्पलस्थलीमिवनिपतितसंध्यातपामेककर्णावसक्त
दंतपत्रप्रभाधवलितकपोलमंडलामुद्यदिंदुकिरणच्छुरितमुखीमिवविभावरीमाकपिलगोरोचनारचिततिलकतृतीयलोचनामीशा
नरचितानुरचितकिरातवेषामिवसवानांसुरस्थलनिवाससंक्रांतनारायणदेहप्रभाश्यामलितामिवश्रियंकुपितहरहुताशनदह्यमान
मदनधूममलिनीकृतामिवरतिमुन्मदहलिहलाकर्षणभयपलायितामिवयमुनामतिवहलपिंडालक्तकरसरागपल्लवितपादपंक
जामचिरमृदितमहिषासुररुधिररक्तचरणामिवकात्यायिनीमालोहितांगुलिप्रभापाटलितनखमयूखांप्रतिकठिनमणिकुट्टिमस्पर्श।

मसृणानां क्षितितले पल्लवसंगानिव निवायसंचरंतीमपि पिंजरेणोत्सर्पिणा नूपुरमणीनां प्रभाजालेन रंजितशरीरतया पावकेनैव भग
वता रूपैकपक्षपातिना प्रजापतिमप्रमाणीकुर्वता जातिसंशोधनार्थमालिंगितदेहामनंगवारणशिरोनक्षत्रमालायमानेन रोमराजिल
तालवालकेन मेखलादाम्ना परिगतजघनस्थलामतिस्थूलमुक्ताफलघटितेन शुचिना हारेण गंगास्रोतसेव कालिंदीशंकया कृतकंठग्रहां।
शरदमिव विकसितपुंडरीकलोचनां प्रावृषमिव घनकेशजालां मलयमेखलामिव चंदनपल्लवावतंसां नक्षत्रमालामिव सचित्रश्रवणाभर
णभूषितां श्रियमिव हस्तस्थितकमलशोभां मूर्छामिव मनोहरां अरण्यभूमिमिवाकृतरूपसंपन्नां दिव्ययोषितमिवाकुलीनां निद्रामिव लोच
नग्राहिणीं अरण्यकमलिनीमिव मातंगकुलदूषितां अमूर्त्तामिव स्पर्शवर्जितां आलेख्यगतामिव दर्शनमात्रैकफलां मधुमासकुसुमसमृ
द्धिमिव विजातिमनंगकुसुमचापलेखामिव मुष्टिग्राह्यमध्यां यक्षाधिपलक्ष्मीमिवालकोद्भासिनीमचिरोपारूढयौवनामतिशयरूपाकृति
मनिमिषलोचनो ददर्श। समुपजातविस्मयस्य चाभून्मनसि महीपतेः अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नस्तथा हि यदि नामेयमात्मरू

दृष्टवतां १

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰ ६ पोपहसिताशेषरूपसंपदुत्पादिताकिमर्थमपगतस्पर्शमिलोगसुखेकृतंकुलेजन्ममन्येचमातंगजातिस्पर्शदोषभयादस्पृशतेयमुत्पा
दिताप्रजापतिनान्यथाकथमियमक्लिष्टतालावण्यस्यानहिकरतलस्पर्शक्लेशितानामवयवानामीदृशीभवतिकांतिः।सर्वथाविधि
धातारमसदृशसंयोगकारिणमतिमनोहराकृतिरपिक्रूर[illegible]ज्ञातिनिष्ठेयेनेयमस्पृश्यीरिवरमणीयाफ्फहेजयतीत्येवमादिचिंतयंतमेव सततनिंदित
राजानमीषदवगलितकर्णपल्लवावतंसाप्रगल्भवनितेवकन्यकाप्रणनाम।कृतप्रणामायांचतस्यांमणिकुट्टिमोपविष्टायांसपुरुष
स्तंविहंगममादायपंजरगतमेवोपसृत्यराज्ञेन्यवेदयद्देवविदितसकलशास्त्रार्थोराजनीतिप्रयोगकुशलःपुराणेतिहासकथाला
पनिपुणोवेदितागीतश्रुतीनांकाव्यनाटकाख्यायिकाख्यानकप्रभृतीनामपरिमितानांसुभाषितानामध्येतास्वयंचकर्तापरिहासालाप
पेशलोवीणावेणुमुरजप्रभृतीनांवाद्यविशेषाणामसमःश्रोतानृत्यप्रयोगदर्शननिपुणश्चित्रकर्मणिप्रवीणः।द्यूतव्यापारेप्रगल्भःप्रण राम
यकलहकुपितकामिनीप्रसादनोपायचतुरोगजतुरगपुरुषस्त्रीलक्षणाभिज्ञःसकलभूतलरत्नभूतोयंवैशंपायनोनामशुकःसर्वरत्ना ६

Digitized by Panjab Digital Library | www.panjabdigilib.org

नांचउदधिरिवदेवोभाजनमितिकृत्वाएनमादायास्मत्स्वामिदुहितादेवपादमूलमायाता।इदयमात्मीयाक्रियतामित्युक्त्वानरपतेःपुरोनिधा
यपंजरमसावयममारादपसृतेतस्मिन्नसौविहंगराजोराजाभिमुखोभूत्वासमुन्नमय्यदक्षिणंचरणमतिस्पष्टवर्णस्वरसंस्कारयागिराकृतजय
शब्दोराजानमुद्दिश्यार्यामिमांपपाठस्तनयुगमश्रुस्नातंसमीपतरवर्त्तिहृदयशोकाग्नेः।चरतिविमुक्ताहारंव्रतमिवभवतोरिपुस्त्रीणां।राजातु
तांश्रुत्वासंजातविस्मयःसहर्षमासन्नवर्त्तिनमतिमहार्हेहेमासनोपविष्टममरगुरुमिवाशेषनीतिशास्त्रपारगमतिवयसमग्रजन्मानमखिले
मंत्रिमंडलेप्रधानममात्यंकुमारपालितनामानमब्रवीत्।श्रुतातावद्भिरस्यविहंगमस्यस्पष्टतावर्णोच्चारणेस्वरेचमधुरता।प्रथमंतावदिदमेव
महदाश्चर्यमसंकीर्णवर्णप्रविभागामभिव्यक्तमात्रानुस्वारसंस्कारसंयोगांविशेषसंयुक्तांयदयमतिस्फुटाक्षरांगिरमुदीरयति।तत्रपुनरपरम
भिमतविषयेतिरश्चोपिमनुजस्येवसंस्कारवतोबुद्धिपूर्वाप्रवृत्तिस्तथाह्यनेनसमुच्छ्रितदक्षिणचरणेनोच्चार्यजयशब्दमियमार्यामामुद्दिश्याति
परिस्फुटाक्षरंगीता।प्रायेणहिपक्षिणःपशवश्चभयाहारमैथुननिद्रासंज्ञामात्रवेदिनोभवंति।इदंतुमहच्चित्रमित्युक्तवतिस्तुजिकुमारपालितः

कादं॰ ७

किंचिद्विस्मितवदनो नृपमवादीत्। देव किमत्र चित्रमेते हि शुकसारिकाप्रभृतयो विहंगविशेषा यथाश्रुतां वाचमुच्चारयंतीत्यधिगतमेव देवे
न तत्राप्यन्यजन्मोपात्तसंस्कारानुबंधेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रं। अन्यदेतेषामपि पुरा मनुष्याणामिवा
तिपरिस्फुटाभिधाना वागासीदग्निशापादपरिस्फुटालापता शुकानामुपजाता करिणां च जिह्वापरिवृत्तिरित्येवमुच्चारयत्येव तस्मिन्नशिशि
रकिरणमंबरतलस्य मध्यमारूढमावेदयन्नाडिकाच्छेदप्रहतपटुपटहनादानुसारी मध्याह्नशंखध्वनिरुदतिष्ठत्। तमाकर्ण्य च समासन्नस्नान
समयो विसर्जितराजलोकः क्षितिपतिरास्थानमंडपादुत्तस्थौ। अथ चलति महीपतावन्योन्यमतिरभससंचलनचालितांगदपत्रभंगमकरकोटि
पाटितांशुकपटानामाक्षेपदोलायमानकंठदाम्नामंसस्थलोल्लसितकुंकुमपटवासधूलिपिंजरितदिशामालोलमालतीकुसुमशेखरोत्पतद
लिकदंबकानामर्धावलंबितैः कर्णोत्पलैश्चुंब्यमानगंडस्थलानां गमनप्रणामलालसानां अहमहमिकया वक्षःस्थलप्रेंखोलितहारलताना राम ७
मुत्तिष्ठतामासीदतिमहान्संभ्रमो महीपतीनां। इतश्चेतश्च निष्पततीनां स्कंधदेशावसक्तचामराणां चामरग्राहिणीनां कमलमधुपानमत्तजरत्क

लहंसनादजझरिणपदेपदेरणितमणीनांनूपुराणांनिनादेनवारविलासिनीजनस्यसंचरतोऽघनस्तलास्फालनरसितरत्नमालिकानां
मेखलानांमनोहारिणाझंकारेणनूपुररवाकृष्टानांचधवलितास्थानमंडपसोपानफलकानांभवनदीर्घिकाकलहंसकानांकोलाहलेनारस
नारसितोत्कंठितानांचतारतरविराविणामुल्लिख्यमानकांस्यकेंकारदीर्घेणगृहसारसानांकूजितेनसरभसप्रचलितसामंतशतचरणता
लाभिहतस्यचास्थानमंडपस्यनिर्घातनिर्घोषगंभीरेणकंपयतेववसुमतींध्वनिना।प्रतीहाराणांचदंडनःससंभ्रमसमुत्सारितजनपदानांदंडि
नांसमारब्धहेलमुच्चैरुच्चार्यतामालोकयतालोकयतेतितारतरदीर्घेणभवनप्रासादकुंजेषुघुरितप्रतिशब्दतयादीर्घितरतामुपागतेनालोक
येतिशब्देनराज्ञांचससंभ्रममावर्जितमौलिलोलचूडामणीनांप्रणमतामसलमणिशलाकादंतुरालिःकिरीटकोटिभिरुल्लिख्यमानमणिकु
ट्टिमस्यनिःस्वनेन।प्रणामपर्यस्तानामतिकठिनमणिकुट्टिमनिपतितरणरणायितानांचमणिकर्णपूराणांनिनादेनमंगलपाठकानांच
घरोयायिनांजयजीवेतिमधुरध्वनिनानुयातेनप्रहतोदिगंतव्यापिनाकलकलेनप्रचलितजनचरणशतसंक्षोतलयादपहायकुट्टिममप्रकर
Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं ८ मुत्पततां च सकलहाहाकृतेन संक्षोभादतित्वरितपदं प्रवृत्तैः खनिपतितैः केयूरकोटिताडितानां क्वणितमुखररत्नदाम्नां च मणिस्तंभा
नां रणितेन सभवनः क्षुभितमिव तदास्थानभवनमभवत् अथ विसर्जितराजलोको विश्रम्यतामिति निश्चयमेवाभिधाय तां चांडालकन्यकां वैशंपा
यनः प्रवेश्यतामभ्यंतरमिति तां कुलकरंकवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यंतरं प्राविशत् अपनीताशेषभूषण
श्च दिवसकर इव विगलितकिरणजालः खंडतारकासमूहशून्य इव गगनाभोगः समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासी
त् तत्र च समानवयोभिः सह राजपुत्रैः कृतमकरव्यायामः श्रमवशादुन्मिषंतीभिः कपोलयोरीषद्वगलितसितसिंदुवारकुसुममंजरीवि
भ्रमाभिरुरसि निर्दयश्रमच्छिन्नहारविगलितमुक्ताफलप्रकरानुकारिणीभिर्ललाटपट्टके ष्टमीचंद्रशकलतललोलसदृष्टमौक्तिकविंदुविंबिनी
भिः स्वेदजलकणिकासंततिभिरलंक्रियमाणमूर्तिरितस्ततः स्नानोपकरणसंपादनसत्वरेण पुनः प्रधावता परिजनेन तत्कालं विरलजनेपि राम
राजकुले ससंभ्रमाधिकारस्थचितमाचरद्भिर्दंडिभिरुपदिश्यमानमार्गो विततसितवितानामनेकपारणगणावबध्यमानमंडलां गंधोदक ८

पूर्णकनकमयद्रोणीसनाथमध्यास्थापितस्फाटिकस्नानपीठमेकांतनिहितैरतिसुरभिगंधसलिलपूर्णैः परिमलावकृष्टमधुकरकु॥
लांधकारितमुखैरातपभयान्नीलकर्पटावगुंठितमुखैरिवस्नानकलशैरुपशोभितांस्नानभूमिमगच्छत्।अवतीर्णस्यचजलद्रोणींवारविलासि
नीकरसंवाहितसुगंधामलकोपलिप्तशिरसोराज्ञःसमंतादुपतस्थुरंशुकनिबिडनिबद्धस्तनपरिकराहूरसमुत्सारितवलयवाजलतासमु
त्क्षिप्तकणीलरणाःकर्णोत्संगोत्सारितालकाःगृहीतजलकलशाःस्नानार्थमभिषेकदेवताइववारयोषितस्ताभिश्चसमुन्नतकुचकलशमंडला
लिवीरिमध्यप्रविष्टःकरिणीभिरिववनकरीपरिवृतःस्वक्षणैराजाजलद्रोणीसलिलादुत्थायचस्नानपीठममलस्फटिकधवलंवरुणइव
राजहंसमारुरोह।ततस्ताःकाश्चिन्मरकतकलशप्रभाश्यामायमानानलिन्यइवमूर्तिमत्यःपत्रपुटैःकाश्चिद्रजतकलशहस्ताःरजन्यइवप्र
एविंदुमंडलविनिर्गतेनज्योत्स्नाप्रवाहेण।काश्चित्कलशोत्क्षेपश्रमस्वेदार्द्रशरीराजलदेवताइवस्फाटिकैःकलशैस्तीर्थजलेन।काश्चि
न्मलयसरितइवचंदनरसमिश्रेणसलिलेन।काश्चिदुत्क्षिप्तकलशपार्श्वविन्यस्तहस्तपल्लवप्रकीर्यमाणनखमयूखजालकाःप्रलंबांगुलि

रसाज ८

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰ ९

विवरविनिर्गतजलधाराःसलिलयंत्रदेवताइवकाश्चित्खेदाधमपनेतुमाह्निकवालातपेनेवदिनश्रियःकनककलशहस्ताःकुंकुमज
लेनवरांगनाःक्रमेणराजानमभिषिषिचुः।अनंतरमुदयाविवस्फोटयन्निवश्रुतिपथमनेकप्रहतपटुपटहझल्लरीमृदंगवेणुवीणागी
तनिनादानुगम्यमानोवंदिवृंदकोलाहलाकुलोभुवनविवरव्यापीस्नानशंखानामापूर्यमाणानांमुखरोध्वनिः।एवंचक्रमेणनिर्वर्तिताभि
षेकोविषधरनिर्मोकपरिलघुनीधवलेपरिधायधौतेवाससीशरदंबरैकदेशइवाजलक्षालनविमलतनुरतिधवलजलधरच्छेदशुचिनादु
कूलपटपल्लवेनरहितनुगिरिरिवगगनसरित्स्रोतसाकृतशिरोवेष्टनःसंपादितपितृजलक्रियोमंत्रपूतेनतोयांजलिनादिवसकरमभिप्र
णम्यदेवगृहमगमत्।अर्चितपशुपतिश्चनिष्क्रम्यनिर्वर्तिताग्निकार्योविलेपनभूमौझंकारिलिरालिकदंबकैरनुबध्यमानपरिमले
नमृगमदकर्पूरकुंकुमवासस्सुरभिणाचंदनेनानुलिप्तसर्वांगोविरचितामोदिमालतीकुसुमशेखरःकृतांबरपरिवर्तोरत्नकर्णपूरमात्रा राम
भरणःसमुचितभोजनैःसहभूपतिभिराहारमभिमतरसास्वादनात्प्रीतिरवनिपोनिर्वर्तयामास।परिपीतधूमवर्तिरुपस्पृश्यगृही ९

Digitized by Panjab Digital Library | www.panjabdigilib.org

ततां स्नलस्समात्स्मृष्टमणिकुट्टिमात्स्वदेशादुत्थायनातिदूरवर्तिन्या ससंभ्रमप्रधावितया प्रतीहार्या प्रसारितमवलंब्यानवरतवेत्रलताग्रह
णप्रसंगादतिकठिनकिसलयानुकारिकरतलं करेणाभ्यंतरसंचारसमुचितेन परिजनेनानुगम्यमानो धवलांशुकजवनिकापरिगतपर्यंतत
यास्फटिकमणिमयभित्तिनिबद्धमिवोपलक्ष्यमाणमतिसुरभिणा मृगनाभिपरिगतेनामोदिना चंदनवारिणा सिक्तशिशिरमणिभूमिमविरल
विप्रकीर्णेन विमलमणिकुट्टिमगगनतलतारागणेनेव कुसुमोपहारेण निरंतरमुपकीर्णशालभंजिकानिवहेन सन्निहितगृहदेवतेनेव गं
धसलिलक्षालितेन कलधौतमयेन स्तंभसंचयेन विराजमानमतिबहलागुरुधूपपरिमलमखिलविगलितजलनिवहधवलजलधरशक
लानुकारिणा कुसुमामोदवासितप्रच्छदपटेन पट्टोपधानाध्यासितशिरोभागं मणिमयप्रतिपादुकाप्रतिष्ठितपादेन पार्श्वस्थितरत्नपादपीठेन
तुहिनगिरिशिलातलसदृशेन शयनेन सनाथीकृतवेदिकं भुक्तास्थानमंडपमयासीत्। तत्र च शयनतलनिषण्णः क्षितितलोपविष्टया शनैः
शनैरुत्संगनिहितासिलतया करंकवाहिन्या नवनलिनदलकोमलेन करसंपुटेन संवाह्यमानचरणस्सकालोचितदर्शनैरवनिपतिभिरमा

त्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन्निव मुहूर्तमिवासांचक्रे। ततो नातिदूरवर्तिनीमंतःपुराद्वैशंपायनमादायागच्छेति समुपजातनतदूनांतप्रश्र
कुतूहलो राजा प्रतीहारीमादिदेश। सा क्षितितलनिहितजानुकरतला यथाज्ञापयति देव इति शिरसि कृत्वाज्ञां यथादिष्टमकरोत्। अथ
मुहूर्तादिव वैशंपायनः प्रतीहार्या गृहीतपंजरः कनकवेत्रलतावलंबिना किंचिदवनतपूर्वकायेन सितकंचुकावच्छन्नवपुषा जराधवलितमौ
लिना गद्गदस्वरेण मंदमंदसंचारिणा विहगजातिप्रीत्या जरत्कलहंसेनेव कंचुकिनानुगम्यमानो राजांतिकमाजगाम। क्षितितलनिहित
करतलश्च कंचुकी राजानं व्यज्ञापयत् देव देव्यो विज्ञापयंति। देवादेशादेष वैशंपायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्या नीत इत्य
भिधाय गते तस्मिन्राजा वैशंपायनमपृच्छत्। कच्चिदभिमतमास्वादितमभ्यंतरे भवता किंचिदशनजातमिति। स प्रत्युवाच। देव किं वा नास्वा
दितं। आमत्तकोकिलालोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जंबुफलरसो हरिनखरभिन्नमत्तमातंगकुंभमुक्तार्द्रमुक्ताफलद्युं
तिखंडितानि दाडिमीबीजानि नलिनीदलहरिंति द्राक्षाफलानि। यथेच्छया प्राचीनामलकीफलानि किं वा प्रलपितेन बहुना सर्वमेव देवीभिः स्वयं

करतलोपनीयमानममृतायितं शम्पेयं वादिनो वचनमाक्षिप्य नरपतिरब्रवीत्। आख्यातावत्त्वमिदमपनयतु नः कुतूहलमावेदयतु
भवानादितः प्रभृति कार्त्स्न्येनात्मनो जन्म कस्मिन्देशे भवाञ्जातः कथं जातः। केन वा नाम कृतं का माता कस्ते पिता कथं वेदानामागमः कथं
शास्त्राणां परिचयः कुतः कलाः समासादिताः किं जन्मान्तरानुस्मरणं उत वरप्रदानमथवा विहगवेषधारी कश्चित्प्रच्छन्नं निवससि। क्व वा पू
र्वमुषितं कियद्वा वयः कथं पंजरबंधः कथं चंडालहस्तगमनं इह वा कथमागमनमिति वैशंपायनस्तु स्वयमुपजातकुतूहलेन सबहुमान
मवनिपतिना पृष्टो मुहूर्त्तमिव ध्यात्वा सादरमब्रवीत् देव महतीयं कथा यदि कौतुकमाकर्ण्यतां। अस्ति पूर्वापरजलनिधिवेलावन लग्ना म
ध्यदेशालंकारभूता मेखलेव भुवो वनकरिकुलमदजलसेकसंवर्द्धितैरतिविकचधवलकुसुमनिकरमत्युच्चतया तारागणमिव शिखर
देशलग्नमुद्वहद्भिः पादपैरुपशोभिता मदकलकुररकुलदश्यमानमरिचपल्लवा करिकलभकरमृदिततमालकिसलयामोदिनी। मधुमदो
परक्तकेरलीकपोलकोमलच्छविना संचरद्वनदेवताचरणालक्तकरसरंजितेनेव पल्लवप्रचयेन संछादिता। शुककुलदलितदाडिमाफलद्र

कादं.
११

वाटीकृततलैरनिलचलकपिकंपितकक्कोलच्युतपल्लवफलशबलैरनवरतनिपतितकुसुमरेणुपांसुलैः पथिकजनरचितलवंगपल्लवस्र
स्तरैः कठोरनालिकेरकेतकीकेसरपरिगतप्रांतैस्तांबूलीलतावनद्धपूगखंडमंडितैर्वनलक्ष्मीवासभवनैरिव विराजिता लत्तामंडपैरुन्मद।
मातंगकपोलस्थलप्रस्रवणसलिलसिक्तेनेव निरंतरमेलालतावनेन मदगंधिनांधकारिता नखमुखलग्नेभकुंभमुक्ताफललुब्धैः शबरसेनाप
तिभिरभिहन्यमानकेसरिशता प्रेताधिपनगरीव सदासन्निहितमृत्युभीषणा महिषाधिष्ठिता च। समरोद्यतपताकिनीव बाणासनारोपितशिली
मुखा विमुक्तसिंहनादा च कात्यायनीव प्रचलितखड्गभीषणा रक्तचंदनालंकृता च कर्णीसुतकथेव संनिहितविपुलाचला शशोपगता च क
ल्पांतप्रदोषसंध्येव नर्त्तितनीलकंठा पल्लवारुणा च अमृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता च प्रावृडिव घनश्यामलानेकशतद्रु
दालंकृता चंद्रमूर्त्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च राज्यस्थितिरिव चमरमृगवालव्यजनोपशोभिता समदगजघटापरिपालिता ११
च गिरितनयेव स्थाणुसंगता मृगपतिसेविता च जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च कामिनीव चंदनमृगमदपरिमलबाहिना हविरा

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्फुरितिलकभूषिता।वसोकंठेवविविधपल्लवानिलजीविता।समदनाचा।बालेवव्याघ्रनखपंक्तिमंडिता।गंडकाननाचपानभूमिरिवप्रक
टितमधुकोशकशता।प्रकीर्णविविधकुसुमाच।क्वचित्प्रलयवेलेवमहावराहदंष्ट्रासमुत्खातधरणीमंडला।क्वचिद्दशमुखनगरीवचंच
लवानरवृंदभज्यमानतुंगशालाकुला।क्वचिदचिरनिर्वृत्तविवाहभूमिरिवहरितकुशसमित्कुसुमसमीपलाशशोभिता।क्वचिदुद्धतमृग
पतिनादभीतेवकंटकिता।क्वचिदुन्मत्तेवकोकिलप्रलापिनी।क्वचिदुन्मत्तेववायुवेगकृततालशब्दा।क्वचिद्विधवेवोन्मुक्ततालपत्रा।क्वचित्सम
रभूमिरिवशरशतनिचिता।क्वचिदमरपतितनुरिवनेत्रसहस्रसंकुला।क्वचिन्नारायणमूर्तिरिवतमालनीला।क्वचित्पार्थरथपताकेववानरा
क्रांता।क्वचिदवनिपतिद्वारभूमिरिववेत्रलताशतदुःप्रवेशा।क्वचिद्विराटनगरीवकीचकशतावृता।क्वचिदम्बरश्रीरिवव्याधानुगम्यमानतरल
तारकमृगा।क्वचि[illegible]गृहीतव्रतेवदर्भचीरजटावल्कलधारिणी।अपरिमितबहलपत्रसंचयापिसप्तपर्णोपशोभिता।क्रूरसत्त्वापिमुनि
जनसेविता।पुष्पवत्यपिपवित्रा।विंध्याटवीनाम।तस्यांचदंडकारण्यांतःपातिसकलभुवनख्यातंउत्पत्तिक्षेत्रमिवभगवतोधर्मस्य।सुरपतिप्रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं
१२

श्चनिपीतसकलसागरसलिलस्यमेरुमत्सरादंबरतलप्रसारितविकटशिखरसहस्रेणदिवसकररथगमनपथमपनेतुमभ्युद्यतेनावग
णितसकलसुरसमूहवचसाविंध्यगिरिणाप्यनुल्लंघिताज्ञस्यजठरानलजीर्णवातापिदानवस्यासुरासुरमुकुटमकरपत्रसंगकोटिचुंबित
चरणरजसोदक्षिणाशामुखविशेषकस्यसुरलोकादेकहुंकारनिपातितनहुषप्रकटप्रभावस्यभगवतोमहामुनेरगस्त्यस्यलोपामुद्रयाच
स्वयमुपरचितालवालकैःकरपुटसलिलसेकसंवर्द्धितैःसुतनिर्विशेषैरुपशोभितंपादपैर्लीर्ययातत्वत्रेणाग्रहीतव्रतेनाषाढिनापवि
त्रभस्मविरचितत्रिपुंड्रकालरागोनाकुशचीरवाससामौंजमेखलाकलितमध्येनगृहीतहरितपर्णपुटेनप्रत्यहमुपहृतताविक्रांदृढदस्युनाम्नाप
वित्रीकृतमतिप्रभूतेध्माहरणाच्चयस्य इध्मवाहइतिपिताद्वितीयंनामचकारादिशिदिशिशुकहरितैश्चकदलीवनैःश्यामलीकृतपरिसरं राम
सरिताचकलशयोनिपरिपीतसागरानुमार्गगतयेववद्धवेणिकयागोदावर्यापरिगतमाश्रमपदमासीत्।यत्रचदशरथवचनमनुपालयन्नु १२
त्सृष्टराज्योदशवदनलक्ष्मीविभ्रमविरामोरामोमहामुनिमगस्त्यमनुचरन्सहसीतयालक्ष्मणोपरचितरुचिरपर्णशालःपंचवट्यांकंचित्कालंसु

Digitized by Panjab Digital Library | www.panjabdigilib.org

खवतुवासाच्चिरशून्येप्यद्यापि यत्र शाखानिलीननिःशब्दपांडुकपोतपंक्तयो लक्ष्यंते तापसाग्निहोत्रधूमराजय इव लक्ष्यंते तरवः। वलिकर्मकुसुमा
न्युद्धरंत्याः सीतायाः करतलादिव संक्रांतो यत्र रागः स्फुरति लताकिशलयेषु। यत्र च पीतोज्झितांबुनिधिजलमिव मुनिना निखिलमाश्रमो
पांतवर्त्तिषु विभक्तं महाह्रदेषु। यत्र च दशरथसुतनिशितशरनिकरनिपातनिहतरजनिचरबलबहलरुधिरसिक्तमूलकमद्यापि तद्रागमिव
विद्धनिर्गतिपलाशमिवाभाति नवकिशलयमरण्यं। अधुनापि यत्र जलधरसमये गंभीरमभिनवजलधरनिवहध्वनिनादमाकर्ण्य भगवतो राम
स्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरंतो न गृह्णंति दूर्वादलकवलमजस्रमश्रुजललुलितदीनदृष्टयो वीक्ष्य शून्या दश दिशो जराजर्जरित
विषाणकोटयो जानकीसंवर्द्धिता जीर्णमृगाः। यस्मिन्ननवरतमृगया निहतशेषवनहरिणप्रोत्साहितइव कृतासीताविप्रलंभः कनककुरंगो राघव
मतिदूरं जहार। यत्र च मैथिलीवियोगदुःखितौ दशवदनविनाशपिशुनौ चंद्रसूर्याविव कबंधग्रस्तौ समं रामलक्ष्मणौ त्रिभुवनभयं महद्बकातुर
न्यायतश्च यस्मिन्न्दशरथसुतशरनिपातितो योजनबाहोर्बाहुरुरगग्रस्तप्रसादनागतनहुषाजगरकायशंकामकरोदृषिजनस्य। जनकतनयाव

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰ सखीविरहविनोदनार्थमिवरचिताभ्यंतरलिखितायत्ररामनिवासदर्शनोत्सुकापुनरिवधरणीतलादुल्लसंतीववनेचरैरद्याप्यालोक्यते। तस्यै
१३ वंविधस्यसंश्रत्यपिप्रकटोपलक्ष्यमाणपूर्ववृत्तांतस्यभगवतोगस्त्याश्रमस्यनातिदूरेजलनिधिपानप्रकुपितवरुणोत्साहितेनागस्त्यमत्सरान्नराश्र
मसमीपवर्त्यपरइववेधसामहाजलनिधिरुत्पादितःप्रलयकालविघटिताष्टदिग्भित्तिसंधिबंधंगगनतलमिवभुविनिपतितं। आदिवरा
हमुद्धृतधरामंडलस्थानमिवसलिलपूरितमनवरतमज्जन्मदशबरकामिनीकुचकलशलुलितजलमुत्फुल्लकुमुदकुवलयकल्हार
उन्निद्रारविंदमकरविंडनिस्यंदबद्धचंद्रकमलिकुलपटलांधकारितसौगंधिकंआरसितमदसारसमुरुहमक्षपानमत्तकलहंसकामिनी
कृतकोलाहलमनेकजलचरपतंगशतसंचलनचलितवाचालवीचिमालंअनिलोल्लासितकल्लोलशिखरसीकरासारदुर्दिनमशंकितावती
र्णाभिरंबरःक्रीडारागिणीभिःस्नानसमयेवनदेवताभिःकेशकुसुमैःसुरलीकृतंएकदेशावतीर्णमुनिजनापूर्यमाणकमंडलुकलजलध्वनिम। १३
नोहरमुन्मिषदुत्पलवनमध्यचारिभिःसवर्णत्वापारसितानुमेयैःकादंबककदंबकैरासेवितंअभिषेकावतीर्णशबलिंडराजसुंदरीकुचचंदन

Digitized by Panjab Digital Library | www.panjabdigilib.org

लिप्तवलिततरंगोत्पातजातकेतकीरजःपटलवद्धकूलशबलितं आश्रमागततापसक्षालिताढकीकल्ककषायपाटलतरंगजलं उपततरविरपि
पल्लवानिलवीजितमविरलतमालवीथिकांधकारितासितवीलिनिर्वासितेन संचरता प्रतिदिनं ऋष्यमूकवासिना सुग्रीवेण वन्यफलपरिलघुल
तासिरूढवासितापसानां देवतार्चनोपयुक्तकुसुमासिरूत्पतज्जलचरपतंगपक्षपुटविगलितजलबिंदुसेकसुकुमारकिसलयानिलतामंडपतल
स्थितशिखंडिमंडलास्वतांडवासिरनेककुसुमपरिमलवाहिनीभिर्वनदेवतानिःश्वासवासिताभिरिव वनराजिभिरुपरुद्धतीरं अपरसागराशंकि
भिः सलिलमादाय मवतीर्णैर्जलधरैरिव बहलपंकमलिनैर्वनकरिभिरनवरतमापीयमानमगाधमनंतमप्रतिममपांनिधानं पंपाभिधानं पद्मस
रः यत्र च विकचकुवलयपलाशश्यामायमानपक्षपुटा अद्यापि स्म्रिन्निमडामशापग्रस्तानीव मध्यचारिणामालोकंते चक्रनामानो मिथुनानि ॥ ॥ तस्यैवं
विधस्य पंपासरसः पश्चिमे तीरे राघवशरप्रहारजर्जरितजीर्णतालतरुखंडस्य समीपे दिग्गजकरदंडानुकारिणा जरदजगरेण सततमावेष्टितमू
लतया वृद्धमहालवालस्वतुंगस्कंधावलंबिभिरनिलवेल्लितैरहिनिर्मोकैर्घृतोत्तरीयस्य दिक्चक्रवालपरिमाणमिव कुर्वता भुवनांतरालविधकोटिन

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰ शाखासंचयेनप्रलयकालतांडवप्रसारितभुजसहस्रमुडुपतिशकलशेखरमिवविडंबयितुमुद्यतःपुराणतयापतनभयादिवपवनस्कंधलग्नै
२५ र्निखिलशरीरव्यापिनीभिरतिदूरोन्नतानिर्जीर्णतयाशिरालैरिवपरिगतोव्रततिभिर्जरातिलकबिंदुभिरिवकंटकैराचरितत्वचःउत्तुंगततःपरिपा
तसागरसलिलैर्गगनागतैःपत्ररथैरिवशाखांतरेषुनिलीयमानैःक्षणमंडलरामसैरार्द्रीकृतपल्लवैर्जलधरपटलैरापह्वदृष्टशिखरदेशःस्कंधगत
यानंदनवनश्रियमिवावलोकयितुमभ्युद्यतःसमीपवर्तिनाउपरिसंचरतामंबरतलगमनखेदादाश्रितानांरविरथतुरंगमाणांसृक्कपरिस्रु
तैःफेनपटलैःसंदेहितजलराशिर्भस्मविलीकृतशिखरशाखोवनगजकपोलकंडूयनलग्नमदमलिनेननिलीनमत्तमधुकरमालेनलोहशृंख
लाबंधनिश्चलेनेवकल्पस्थायिनामूलेनसमुपेतःकोटरांतरनिविष्टैःस्फुरद्भिःसजीवइवमधुकरपटलैःदुर्योधनइवोपलक्षितशकुनिपक्ष
पातोनलिननाभइवभवनमालोपगूढोनवजलधरव्यूहइवनलसिद्दर्शितोन्नतिःअखिलभुवनतलावलोकनप्रासादइववनदेवतानामधिपति राम
रिवदंडकारण्यस्यनायकइवसर्ववनस्पतीनांसखेवविंध्यस्यशाखाबाहुभिरुपगृह्येवविंध्याटवीमवस्थितोमहाजीर्णःशाल्मलीवृक्षः॥ २५

Digitized by Panjab Digital Library | www.panjabdigilib.org

तत्रचशाखाग्रेषुकोटरोदरेषुपल्लवांतरेषुस्कंधसंधिषुजीर्णवल्कलविवरेषुमहावकाशतयाविस्रब्धविरचितकुलायसहस्राणिदुरारोहतया।
विगतविनाशभयानिनानादेशसमागतानिशुकशकुनिकुलानिप्रतिवसंतिस्म।यैःपरिणामविरलदलसंहतिरपिसवनस्पतिरविरलदलनिच
यश्यामलइवोपलक्ष्यतेदिवानिशंनिलीनैः।तेचतस्मिन्वनस्पतावतिवात्यानिवात्यरजनीमात्मनीडेषुप्रतिदिनमुत्थायोत्थायाहारान्वेषणायन
भसिविरचितपंक्तयोमदकल हलधरहलमुखाकृष्टविप्रकीर्णस्रोतसमंबरतलेकलिंदकन्यामिवदर्शयंतःसुरगजास्फालितविगलदाकाशगंगाक
मलिनीशंकामुपजनयंतोदिवसकररथतुरगप्रलालिप्तमिवगगनतलमुपपादयंतःसंचारिणीमिवमरकतस्थलींविडंबयंतःशैवलपल्लवावलीमिवां
वरसरसिप्रसारयंतोगगनविततैःपक्षपुटैःकदलीदलैरिवदिनकरकरनिकरपरिखेदितान्याशामुखानिवीजयंतोवियतिविसारिणींशुकवीथीमि
वारचयंतःसेंद्रायुधमिवांतरिक्षमादधानाविचरंतिस्मशुकशकुनयःकृताहाराश्चपुनःप्रतिनिवृत्त्यात्मकुलायावस्थितेभ्यःशावकेभ्योविविधफलरसा
न्कलमंजरीविकारांश्चप्रहतहरिणरुधिरानुरक्तशार्दूलनखकोटिपाटलेनचंचुपुटेनदत्वादत्वाधरीकृतसर्वस्नेहेनासाधारणेनगुरुणापत्यप्रेम्णा।

म२

Digitized by Panjab Digital Library | www.panjabdigilib.org

तस्मिन्नेवकोटरांतर्निहिततनयाः क्षपाः क्षपयंतिस्म। एकस्मिंश्चजीर्णकोटरेजाययासहनिवसतः पश्चिमेवयसिवर्त्तमानस्यकथमपिपितुरहमेवै-
कोविधिवशात्सूनुरभवं। अतिप्रबलयाचाभिभूताममैवजायमानस्यप्रसववेदनयाजननीमेलोकांतरमगमत्। अभिमतजायाविनाशशोकदुःखितो
पिचसुतस्नेहादंतर्निरुध्यप्रसरमपिशोकावेगमेकाकीमत्संवर्द्धनपरएवाभवत्। अतिपरिणतवयाश्चकृशशरीरानुकारिणीमन्याव-
शिष्टजीर्णपिच्छजालजर्जरामंसदेशशिथिलामपगतोत्पतनसंस्कारांपक्षसंततिमुद्वहन्नुपारूढकंपतयाचसंतापकारिणीमंगलग्नांज-
रामिवविक्षिपन्परुषकठोरशेफालिकावृंतमनानलपिंजरेणकलममंजरीदलनमसृणितकोणेनापांतलेखेनस्फुटितायकोटिनाचंचुपुटेनपर-
नीडनिपतिताभ्यःशालिवल्लरीभ्यस्तंडुलकणानादायादायतरुमूलनिपातितानिचशुककुलावदलितानिफलशकलानिसमाहृत्यपरिभ्रमितुमश-
क्तोमह्यमदात्। प्रतिदिवसमात्मनाचमदुपभुक्तशेषमशनमकरोत्। एकदातुप्रभातसंध्यारागलोहितेगगनतलकमलिनीमधुरक्तपक्षसंपुटेवृद्ध- १५
हंसइवमंदाकिनीपुलिनादपरजलनिधितटमवतरतिचंद्रमसिपरिणतरंकुरोमपांडुनिव्रजतिविशालतामाशाचक्रवालेगजरुधिररक्तहरिसटा॥

ग

Digitized by Panjab Digital Library | www.panjabdigilib.org

लोमलोहिनीनिराततत लादिकतंतुपाटलासिरायामिनीतिरशिशिरकिरणदीधितिनिःपद्मरागरत्नशलाकासंमार्ज्जनीभिरिव समुत्सार्यमा
णे गगनकुट्टिमकुसुमप्रकरे तारागणे संध्यामुपासितुमुत्तराशावलंबिनि मानससरस्तीरमिवावतरति सप्तर्षिमंडले तटगतविघटितशुक्तिसं
पुटविप्रकीर्णमरुणकरप्रेरणाविगलितमुडुगणमिव मुक्ताफलनिकरमुद्वहति धवलितपुलिनतटमुद्वाति पूर्वेतरे तुषारबिंदुवर्षिणि
ते४ विस्तीर्णे निशावसानजातजडिम्नि विबुद्धशिखिकुले विजृंभमाणकेसरिणि करिणीप्रबोध्यमानमदकशितास्य इव जाते प्रभाते ह्रपाजल
जडकेसरं कुसुमनिकरमुदयगिरिशिखरस्थितं सवितारमिवोद्दिश्य पल्लवांजलिभिः समुत्सृजति काननेऽमलरोमकेसरासु वनदेवता वनराजिछ-४
प्रासादानां तरूणां शिखरेषु पारावतमालायमानासु धर्मपताकास्विव समुन्मिषंतीषु तपोवनाग्निहोत्रधूमलेखासु अवश्यायसीकरिणि
स्खलितकमलवनेरतखिन्नशबरसीमंतिनीस्वेदकणिकापहारिणि वनमहिषरोमंथफेनबिंदुवाहिनि चलितपल्लविलतालास्योपदेशव्यस
निनि विघटमानकमलखंडमकरंदशीकरासारवर्षिणि कुसुमामोदतर्पितालिजाले निशावसानजातजडिम्नि मंदमंदं संचारिणि प्रवाति पवना

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰
१६

तिकेमातरिश्वनिक्रमेणप्रबोधमंगलपाठकानामिलमंडडिंडिमानांमधुलिहांकुमुदोदरेषुघनघटमानदलपुटनिबद्धपक्षसंहतीनां।
मुखरत्सुझंकारेषुप्रभातशिशिरमारुताहतमुक्तमस्तजरसाश्लिष्टपक्ष्ममालमिवसशेषनिद्राजिह्मतारंचक्षुरुन्मीलयत्सुशनैःशनैस्तृणखर
शय्याधूसरक्रोडरोमराजिषुवनमृगेषूत्थितेषुततःसंचरत्सुवनचरेषुविजृंभमाणेश्रोत्रहारिणिपंपासरःकलहंसकोलाहलेसमुल्लसतिनर्त्ति
तशिखंडिनिमनोहरेवनगजकर्णतालशब्देक्रमेणचगगनमार्गमवतरतोदिवसकरवारणस्यावचूलचामरकलापइवोपलक्ष्यमाणे
मंजिष्ठारागलोहितेकिरणजालेशनैःशनैरुदितेभगवतिसवितरिपंपासरःपर्यंततरुशिखरसंचारिणिपद्माभितागिरिशिखरेदिवसकर
उन्मनिहततारेषुनरपिकपीश्वरेवनमालिपततिबालातपेस्पष्टेजातेप्रत्यक्षसिनाचिरादिवदिवसाष्टमभागभाजिस्पष्टेतासितास्वाति
भूतेचप्रयातेषुयथाभिमतानिदिगंतराणिशुककुलेषुकुलायनिलीननिभृतशावसनाथेपिनिःशब्दतयाशून्यइवतस्मिन्वनस्प राम
तौाम्रनीडावस्थितएवतातेमयिचशैशवादसंजातबलमसमुद्भिद्यमानपक्षपुटेतातसमीपवर्त्तिनिकोटरगतेसहसैवतस्मिन्महावनेसं १६

जा

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्रासितसकलवनचरःसरभसमुत्पतत्पतत्रिपक्षपुटशब्दसमाक्रांततोलीनकरिपोतचीत्कारपीवरःप्रचलितलताकुलितमत्तालिकु
लझंकारमांसलःपरिभ्रमदुद्घोणवनवराहरवघर्घरोगिरिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितःकंपयन्निवतरून्भगीरथावतार्यमाण
गंगाप्रवाहकलकलबहलोभीतवनदेवताकर्णितोमृगयाकोलाहलध्वनिरुदचरत्।आकर्ण्यैतमहमुपजातवेपथुरर्भकतया
जर्जरितकर्णविवरोभयविह्वलःसमीपवर्त्तिनःपितुःप्रतीकारबुद्ध्याजराशिथिलपक्षपुटांतरमविशं।अनंतरंचसरससमितोगजयूथप
तिभग्नितकमलिनीपरिमलःक्रोडकुलदश्यमानलड्डुमुस्तारसामोदइतःकरिकुलतलड्डूयमानसल्लकीकषायगंधइतोनिपतितशुष्क
पत्रमर्मरध्वनिरितोवनमहिषविषाणकोटिकुलिशशिख्यमानवल्मीकध्वनिरितोश्राकरवकाभितोवनगजकुलाभितोवराहयूथाभितो
वनमहिषवृंदमितःशिखंडिमंडलविरुतमितःकपिंजलकुलकलकूजितमितःउरस्कुलक्वणितमितोमृगपतिनखशिख्यमानकुंभकुं
जरारसितमितःकर्दमाइपंकमलिनावराहपद्धतिरियमतिनवशष्पकवलरसश्यामलाहरिणरोमंथफेनसंहतिरयमुन्मदगंधगजगंडकंडू

Digitized by Panjab Digital Library | www.panjabdigilib.org

विरुति

कादं यनपरिमलालीनमुखरमधुकरकरसरुरेषानिपतितरुधिरविंदुसिक्तशुष्कपत्रपाटलातरुपदवीएनद्विरदवराश्दितविटपिपल्लवपटल
२७ मेतलवङ्गिकुलक्रीडितमेषनखकोटिविलसितविकटपत्रलेखोरुधिरपटलः करिमौक्तिकदलदंतुरोमृगपतिमार्गः एषाप्रत्यग्रप्रसूत
वनमृगीगलरुधिरलोहितीभूमिरियमखवीवेणिकाकारिणीपक्ववरस्ययूथपतेर्मदजलमलिनानांसंचारवीथीचमरीपंक्तिरियमनुग
म्यतामुच्छुष्कमृगकरीषपांसुलात्वरिततरमध्यास्यतामियंवनस्थलीतरुशिखरमारुह्यतामालोक्यतांदिशियमाकर्ण्यतामयंशब्दो
गृह्यतांधनुरवहितैः स्थीयतांविमुच्यंतांश्वानइत्यन्योन्यमभिवदतोमृगयासक्तस्यमहतोजनसमूहस्यतरुगहनांतरितविग्रहस्यक्षो
भितकाननंकोलाहलमशृणवं ॥ अथनातिचिरादेवानुलेपनाङ्मृदंगध्वानधारेणगिरिविवरविजृंभितप्रतिनादमांसलेणशरताडि
तानांकेसरिणांनिनादेनसंत्रस्तयूथमुक्तानामेकाकिनांसंचरतामनवरतकरास्फोटमिश्रेणजलधररसितानुकारिणागजयूथपती २७
नांकंठगर्जितेनसरभसमसारमेयविलंघ्यमानावयवानामालोलकातरतरलतरतारकाणामेणकानांचकरुणकूजितेननिहतयूथप

Digitized by Panjab Digital Library | www.panjabdigilib.org

तीनांवियोगिनीनामनुगतकलत्राणांवच्छित्वाछित्वासमाकर्ण्यकलकलमनुकर्णपल्लवानामितस्ततःपरिभ्रमंतीनांपतिविनाशशोक
दीर्घीकरिणीनांचीत्कृतेनकतिपयदिवसप्रसूतानांचखड्गिधेनुकानांत्रासपरिभ्रष्टपोतान्वेषिणीनामनुरुक्ककंठमतिकरुणमारसंती
नामाक्रंदितेनतरुशिखरसमुत्पतितानामाकुलाकुलचारिणांचपञ्जरस्थानांकोलाहलेनत्वरयानुसारप्रधावितानांचमृगपतीनांयुगपद
तिरलसपादपातावहतायाभुवःकंपमिवजनयताचरणशब्देनकर्णोत्कृष्टिजृम्भतांचमदकलकुररकामिनीकंठकूजितकलेनशर
निकरवर्षिणांधनुषांनिनादेनपवनाहतिक्वणितधाराणामसीनांस्वकठिनमहिषस्कंधपीठपातितानांरणितेनशुनांचसरलमविसृष्टघर्घ
रध्वनीनांवनांतरव्यापिनाध्वानेनसर्वतःप्रचलितमिववनदेवतामलवत्।अचिराच्चप्रशांतेतस्मिन्मृगयाकलकलेनिर्वृष्टिमूकजलधरवृं
दानुकारिणिमथनावसानोपशांतवारिणिसागरइवस्तिमिततामुपागतेकाननेमंदीभूततनयोहमुपजातकौतूहलःपितुरुत्संगादीष
दिवनिष्क्रम्यकोटरस्थएवशिरोधरांप्रसार्यसंत्रासतरलतारकःशैशवात्किमिदमितिसमुपजातदिदृक्षुरेवदिशंचक्षुःप्राहिणवं।अतिसु

कुरूरते स्ता

कादं॰ १९

खमापतत्तस्माद्वनांतरादर्जुनभुजदंडसहस्रविप्रकीर्णमिवनर्मदाप्रवाहमनिलवशचलितमिवतमालकाननंएकीभूतमिवकालरा
त्रीणांयामसंघातमंजनशिलास्तंभसंसारमिवक्षितिकंपविघूर्णितमंधकारपुंजमिवरविकिरणाकुलितमंतकपरिवारमिवपरिभ्रमं
तमवदारितरसातलोत्थितमिवदानवलोकमशुभकर्मसमूहमिवएकत्रसमागतमशेषदंडकारण्यवासिमुनिजनशापसार्थमिवसंच
रंतमनवरतशरनिकरवर्षाभिहतंखरदूषणबलनिवहमिवपिशाचतामुपगतंकलिकालबंधुवर्गमिवसंगतमवगाहप्रवृत्तमिव
वनमहिषयूथमचलशिखरस्थसिंहकराकृष्टिपतनशीर्णमिवकालमेघपटलमखिलरूपविनाशायधूमकेतुजालमिवसमुद्गतमंधका
रितकाननमनेकसहस्रसंख्यमतिलघुजननमुत्थानवेतालजातमिवशवरसैन्यमद्राक्षमध्येस्यातिमहतःशवरसैन्यस्यप्रथमेवयसिवर्त्तमानं राम १९
अतिकर्कशत्वादायसमयमिवनिर्मितमेकलव्यमिवजन्मांतरगतमुद्भिद्यमानश्मश्रुराजितयाप्रथममदलेखामंच्यमानगंडभित्तिमिवगजयू
थपतिकुमारकमसितकुवलयश्यामेनदेहप्रभाप्रवाहेणकालिंदीजलेनेवस्रयंतमरण्यंआकुटिलाग्रेणस्कंधावलंबिनाकुंतललतारे

Digitized by Panjab Digital Library | www.panjabdigilib.org

णाकेसरिणामिवगजमदमलिनीकृतेनकेसरकलापेनोपेतमायतललाटमनतितुंगघोरघोणमेककर्णीवरणतामुपनीतस्यभुजंगफणा
मणेरागपाटलैरंशुभिरालोहितीकृतेनपर्णशयनात्प्रासात्तन्नपल्लवरागेणेववामपार्श्वेनविराजमानंअचिरप्रहतगजकपोलगृहीतेनसप्तच्छ
दपरिमलवाहिनाकृष्णागुरुपंकेनेवसुरभिणामदेनकृतांगरागमुपरितमालपरिमलांधेनभ्रमतामायूरानापत्रात्रकारिणामधुकरकुलेन
तमालपल्लवेनेवनिवारितातपंआलोलकर्णपल्लवव्याजेनभुजबलनिर्जितयानयप्रभुक्तसेवयाविंध्याटव्येवकरतलेनापमृज्यमानगंडस्थ
लस्वेदलेखमापाटलयाहरिणकुलक्षयकृपासंध्यायमानयाशोणितार्द्रयेवदृष्ट्यारंजयंतमाशाविलामानाजानुलंबेनवनकुंजरकरसमा
णमिवगृहीतानिर्मितेनचंडिकारुधिरदानार्थमसकृच्छितशस्त्रोल्लेखविषमितशिखरेणभुजयुगलेनोपशोभितमंसांतरालमस्रपा
नमहरिणरुधिरबिंदुनास्वेदजलकणिकाचितेनगुंजाफलविमिश्रैःकरिकुंभमुक्ताफलैरिवरचितालरणेनविंध्यशिलातलविशालेनवक्ष
स्थलेनोद्भासमानमविरतश्रमायासाक्षामउल्लिखितोदरमितमदमलिनमालानस्तंभयुगलमुपहसंतमिवोरुदंडयेनलाक्षालोहितकौशेय

कादं
१९

परिधानमकारणेपिक्रूरतयाबद्धत्रिपताकोग्रभृकुटीकरालेललाटफलकेपवलतक्राराधिततयामत्परिग्रहोयमितिकात्यायन्यात्रिशू
लेनेवांकितमुपजातपरिचयैरत्युग्रगन्धिभिःश्रमवशाद्वैरविनिर्गताभिःस्वभावपाटलतयास्वच्छाभिरपिहरिणशोणितमिवक्षरंतीभिर्द्वि
द्धाभिरावेद्यमानखेदैर्विहितशुश्रूषतयास्यस्पष्टदृष्टदंतांशून्यदंष्ट्रांतरालग्नकेसरिसटानिवहस्थूलशाणगाढवद्धाभिःस्थूलवराटकमालिकापरिग
तकंठैर्महावराहदंष्ट्राप्रहारजर्जरैरन्यकायैरपिमत्तशक्तिवारनुपजातकेसरैरिवकेसरिकिशोरकैर्मृगवधूवैधव्यदानदक्षैरनेकवर्णैः
श्वभिरतिप्रमाणाभिश्चकेसरिणामभयप्रदानयाचनार्थमागताभिः।सिंहीभिरिवकौलेयककुटुंबिनीभिरनुगम्यमानंकेश्चिद्गृहीतचमर
वालगजदंतभारैःकेश्चिदविडपर्णबद्धमधुपटैःकेश्चिन्मृगपतिभिरिवगजकुंभमुक्ताफलनिकरसनाथपाणिभिःकेश्चिद्यातुधानैरिव
गृहीतपिशिताहारैःकेश्चित्प्रमथैरिवकेसरिकृत्तिधारिभिःकेश्चित्क्षपणकैरिवमयूरपिच्छधारिभिःकेश्चिच्छिशुभिरिवकाकपक्षधरैःकेश्चि १९
त्कृष्णचरितमिवदर्शयद्भिःसमुत्खातविहितगजदंतैःकेश्चित्तदुर्दिनदागमदिवसैरिवजलधरसमयच्छायामलिनैरनेकवृत्तांतैःशवरवृंदैःपरि

Digitized by Panjab Digital Library | www.panjabdigilib.org

रक्तमरणपमिवसखड्गधेनुकंअभिनवजलधरमिवमयूरपिच्छचित्रचापधारिणंबकराक्षसमिवगृहीतैकचक्रं।अरुणानुजमिवोद्धृताने
कमहानागदशनं।भीष्ममिवशिखंडिशत्रुंनिदाघदिवसमिवसततविसृतमृगतृष्णंविद्याधरमिवमानसवेगंपराशरमिवयोजनगंधानु
सारिणंघटोत्कचमिवभीमरूपधारिणंअचलराजकन्यकाकेशपाशमिवनीलकंठचंद्रकालंकृतंहिरण्याक्षदानवमिवमहावराहदंष्ट्राविभि
न्नवक्षःस्थलं।अतिरागिणमिवकृतबहुबंदिपरिग्रहंपिशिताशनमिवरक्तबहुलं।गीतमिवनिषादानुगतंअंबिकात्रिशूलमिवमा
हिषरुधिरार्द्रकायं।अतिनवयौवनमपिक्षपितबहुवयसंकृतसारमेयसंग्रहमपिफलमूलाशनंकृष्णमप्यसुदर्शनंस्वच्छंदचारमपिदु
र्गैकशरणं।क्षितिभृत्पादानुवर्तिनमपिराजसेवानभिज्ञंअपत्यमिवविंध्यस्यअंशावतारमिवकृतांतस्यसहोदरमिवपापस्यसारथिमि
वकलिकालस्यभीषणमपिमहासत्त्वतयागंभीरमिवोपलक्ष्यमाणंअनभिभवनीयाकृतिंमातंगकनामानंशबरसेनापतिमपश्यं।अभिधा
नंतुपश्चात्तस्याहमश्रौषं।आसीच्चमेमनसि।अहोमोहप्रायमेतेषांजीवितंसाधुजनगर्हितंचरितंतथाहिपुरुषपिशितोपहारेधर्मबुद्धिः

Digitized by Panjab Digital Library | www.panjabdigilib.org

का॰दं॰ आहारःसाधुजननिंदितोमधुमांसादिःश्रमोमृगयाशास्त्रंशिवारुतंसदुपदेष्टारःसदसत्तांकौशिकाःप्रज्ञाशकुनिज्ञानेपरिचिताःश्वा
२० नोराज्यंशून्यास्वटवीषु।आपानकमुत्सवोमित्राणिक्रूरकर्मसाधनानिधनूंषिसहायाविषदिग्धमुखाभुजंगाइवसायकाःगीतमुत्साह
कारिमुग्धमृगाणांकलत्राणिबंदिगृहीताःपरयोषितःक्रूरात्मभिःशार्दूलैःसहसंवासःपशुरुधिरेणदेवतार्चनंमांसेनबलिकर्म्मचौर्येण
जीवनं।भूषणानिभुजंगमणयःयस्मिन्नेवकाननेनिवसंतितदेवोत्खातमूलमशेषतःकुर्वंति।इतिचिंतयत्येवमयिसशबरसेनापतिरा
टवीपरिभ्रमणसमुद्भवंश्रममपनिनीषुरागत्यतस्यैवशाल्मलितरोरधश्छायायामवतारितकोदंडस्त्वरितपरिजनोपनीतेपल्लवासने
समुपाविशत्।अन्यतरस्तुशबरयुवाससंभ्रममवतीर्यतस्मात्करयुगलपरिस्रुतोसितांलसःसरसोवैडूर्यद्रवानुकारिप्रलयदिवसकरकि
रणोपतापाद्देवैकदेशमिवविलीनंइंदुमंडलादिवप्रस्यंदितंद्रुतमिवमुक्ताफलनिकरंअत्यच्छतयास्पर्शा नुमेयंहिमजडमरविंदकोशरजः
कषायमंभःकमलिनीपत्रपुटेनप्रत्यग्रोद्धृतांश्चधौतपंकनिर्मलमृणालिकाःसमुपाहरत्।आपीतसलिलश्चसेनापतिस्तामृणालिकाःशशिक २०

Digitized by Panjab Digital Library | www.panjabdigilib.org

लाश्वसैंहिकेयः क्रमेणास्तशात्म। अपगतश्रमस्तोद्धायपरिपीतांभसा सकलेन तेन शवरसैन्येनानुगम्यमानः शनैः शनैरभिमतदिगंतरमयासी
त्। एकतमश्च जरच्छवरस्तस्मादनुपलिंदवृंदादनासादितहरिणपिशितः पिशिताशन इवातिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मु
हूर्तमिव च्छलं वत्वा। अंतरिते च शवरसेनापतौ स जीर्णशवरः पिवन्निवास्माकमायूंषि रुधिरविंदुपाटलया कपिलभ्रूलतापरिवेषनीषता
या दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि निरूपेनश्च विहगामिषास्वादलालसः सुचिरमारुरुहे तं वनस्पतिमामूलादपशपता उत्क्वां
तमिव तस्मिन् क्षणे तदालोकनभीतानां शुककुलानामभूत्। किमिव हि दुष्करमकरुणानां यतः स तमनेकतालतुंगमभ्रंकषशाखाशिख
रमपि सोपानैरिवायत्नेनैव पादपमारुह्य ताननुपजातोत्पतनशक्तीन् कांश्चिदल्पदिवसजातान् गर्भछविपाटलाञ्छाल्मलीकुसुमशं
कामुपजनयतः कांश्चिदुद्भिद्यमानपक्षतया नलिनीसंवर्तिकानुकारिणः कांश्चिदर्कफलसदृशान् कांश्चिल्लोहितायमानचंचुकोटीनीषद्वि
घटितदलपुटपाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः कांश्चिदनवरतशिरःकंपव्याजेन निवारयत इव प्रतीकारासमर्थानेकैकता

कादं॰
२१

याफलानीवतस्यवनस्पतेःशाखांतरेभ्यःकोटरांतरेभ्यश्चशुकशावकानग्रहीदपगतासूंश्चकृत्वाक्षितावपातयत्।तातस्तुमहांतमकांडइव
प्राणहरमप्रतीकारमुपप्लवमुपनतमालोक्यद्विगुणतरोपजातवेपथुर्मरणतयाउद्भ्रांततरलतारकोविषादशून्यामश्रुजलप्लुतांदृशमि
तस्ततोदिक्षुविक्षिपन्नुच्छुष्कतालुरात्मप्रतीकाराक्षमस्त्राससस्रस्तसंधिशिथिलेनपक्षसंपुटेनाच्छाद्यतत्कालोचितंप्रतीकारमपश्यमानःस्नेहपर
वशोमद्रक्षणाकुलःकिंकर्तव्यताविमूढःक्रोडेविलीनेनमामवष्टभ्यतस्थौ।असावपिपापःक्रमेणशाखांतरैःसंचरमाणःकोटरद्वारमागत्यजी
र्णासितभुजंगभीषणंप्रसार्यविविधवनवराहवसाविस्रगंधिकरतलमनवरतकोदंडगुणाकर्षणकिणांकितप्रकोष्ठमंतकदंडानुकारिणं
वामबाहुमतिनृशंसोमुहुर्मुहुर्दत्तचंचुप्रहारमुकूजंतमाकृष्यतातमपातासुमकरोत्।मांतुस्वल्पत्वाद्भयसंपिंडितांगत्वात्मावशेषत्वादा
युषःकथमपितत्पक्षसंपुटांतर्गतंनालक्षयत्।उपरतंचतमवनितलेशिथिलशिरोधरमधोमुखममुंचत्।अहमपितच्चरणांतरालप्रवेशित राम
शिरोधरोनिभृतमंकनिलीनस्तेनैवसहापतं।अवशिष्टपुण्यतयाचपवनवशसंपुंजितस्यमहतःशुष्कपत्रराशेरुपरिपतितमात्मानमपश्यं २१

Digitized by Panjab Digital Library | www.panjabdigilib.org

अंगाभियेनमेनाशीर्यंतायावच्चासौतस्मात्तरुशिखरादवतरितावदहमवशीर्णपर्णासवर्णत्वादस्फु...टोपलक्ष्यमाणःकृतिःपितरमुप
रतमुत्सृज्यत्कृष्टशंसस्वप्राणपरित्यागयोग्येऽपिकालेबालतयाकालांतरभुवःस्नेहस्यानभिज्ञोजन्मसहभुवाभयेनैवकेवलमभिद्रूय
मानःकिंचिदुपजाताल्पपक्षतयाम्यामीपतरकृतगमनावष्टंभोलुठन्नितस्ततःकृतांतमुखकुहरादिवविनिर्गतिमात्मानंमन्यमानोनाति
दूरवर्तिनःशावरसुंदरीकर्णपूररचनोपयुक्तपल्लवस्यसंकर्षणपटनीलदलच्छाययोपहसतइवगदाधरच्छविमच्छैःकालिंदीजलच्छेदैरि
वविरचितच्छदस्यवनकरिमदसलिलैरिवोपसिक्तकिशलयस्यविंध्याटवीकेशपाशश्रियमुद्वहतोदिवाप्यंधकारितशाखांतरस्याप्र
विष्टसूर्यकिरणगातिगहनमपरस्येवपितुरुत्संगमतिमहतस्तमालविटपिनोमूलदेशमविशं।अवतीर्यचसतेनसमयेनक्षितितलवि
प्रकीर्णानसंहृत्यतान्शुकशिशूनेकलतापाशसंयतानावध्यपणाद्रिटेआतित्वरितगमनःसेनापतिर्यातेनैववर्त्मनातामेवदिशमगच्छत्
मांत्वलब्धजीविताशंप्रत्यग्रपितृमरणशोकशुष्कहृदयमतिदूरपातादायासितशरीरंसंत्रासजातसर्वांगोपतापिनीबलवतीपिपासापरव

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं शममकरोत्।अनयाचकालकलयासुदूरमतिक्रांतःसपापस्तदितिपरिकलय्यकिंचिदुन्नमितकंधरोभयचकितयादृशादिशोवलो
२२ कयंस्तृणेपिचलतिपुनःप्रतिनिवृत्तंशंकितमेवपदेपदेपापकारिणामुत्प्रेक्षमाणोनिष्क्रम्यतस्मात्तमालमूलात्सलिलसमीपमुपसर्तुंप्र
यत्नमकरवं।अजातपक्षतयाचनातिस्थिरचरणसंचारस्यमुहुर्मुहुर्मुखेनपततोमुहुस्तिर्यङ्निपतंतमात्मानमेकयापक्षपाल्यासं
धारयतःक्षितितलसंसर्पणश्रमातुरस्यानभ्यासवशादेकमपिदत्वापदमनवरतमुन्मुखस्यस्थूलस्थूलंश्वसतोधूलिधूसरस्यसं
सर्पतोममसमभून्मनस्यतिकष्टास्वप्यवस्थासुप्रजीवितनिरपेक्षानभवंतिखलुजगतिसर्वप्राणिनांप्रवृत्तयोनास्तिजीवितादन्यदभि
मततरमिहजगतिजंतूनामेवमुपरतेपिसुगृहीतनाम्नितातेयदहमविकलेंद्रियःपुनरेवप्राणिमिधिङ्मामकरुणमतिनिष्ठुरमहो
सोढपितृमरणशोकदारुणंयेनमयाजीव्यते।उपकृतमपिनापेक्षतेखलंहिखलुमेहृदयमहंहिखलुमेहृदयमहंहिलोकांतरगता राम
यामंबायांनियमप्यशोकवेगमाप्रसवदिवसात्परिणतवयसापिसतातेनस्नेहरूपायैःसंवर्द्धनक्लेशमतिमहांतमपिस्नेहवशादगणयतातातो २२

Digitized by Panjab Digital Library | www.panjabdigilib.org

तेनयत्परिपालितमस्मत्सर्व्वमेकपदेविस्मृतमतिकृपणाःखल्विमेमप्राणाःयदुपकारिणमपितातमुपयातंनानुगच्छंति।सर्व्वथानैकंच
नखलीकरोतिजीवितंतृष्णा।यदीदृगवस्थमपिमामयमायासयतिजलाभिलाषोमन्येचागणितपितृमरणशोकस्यनिर्घृणतेवकेवलमि
यंममसलिलपानबुद्धिरद्यापिदूरएवसरस्तीरंतथाहिजलदेवतानूपुररवानुकारिदूरेद्यापिकलहंसविरुतमेतदस्फुटंश्रूयंतेसारसर
सितानि।अयंचविप्रकर्षादाशासुखमप्यविरलःसंचरतिनलिनीखंडपरिमलोदिवसस्यचेयमतिकष्टादशावर्त्ततेरविरंबरतलमध्य
वर्त्तीस्फुरंतमातपमनवरतमनलधूलिनिकरमिवविकिरतिकरैरधिकामुपजनयतितृषमातपस्पर्शमिंतप्तपांसुपटलदुर्गमाचभूमि
रतिप्रबलपिपासावसन्नानिगंतुमल्पमपिमेनालमंगकानिअप्रभुरस्मिनचात्मनःसीदतिमेहृदयमंधकारतामुपयातिचक्षुरपिनामखल
लोविधिरनिच्छतोपिमेमरणमद्योपपादयेदित्येवंचिंतयत्येवमयितस्मात्सरसोनातिदूरवर्त्तिनितपोवनेजाबालिर्न्नाममहातपामुनिःप्रति
वसतिस्म।तत्तनयश्चहारीतनामातापसकुमारकःसनत्कुमारइवसर्व्वविद्यावदातचेताःसवयोभिरपरैस्तपोधनकुमारकैरनुगम्यमानस्त्रे

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰
२३

नैवपथ्याद्वितीयइवभगवान्विभावसुरनंततेजस्वितयादुर्न्निरीक्ष्यमूर्त्तिरुद्यतोदिवसकरमंडलादिवोत्कीर्णस्निग्धडिङ्गशिखरचितावयवस्तम
कनककडवेणेवबहिरुपलिप्तमूर्त्तिरापिशंगावदातयादेहप्रभयास्फुरंत्यासबालातपमिवदिवसंसदावानलमिवबनमुपदर्शयंस्तप्तलो
हलोहितानामनेकतीर्थाभिषेकपूतानामंसस्थलावलंबिनीनांजटानांनिकरेणोपेतःस्तंभितशिखाकलापःखांडववनदिधक्षयाकृतक
पटवटुवेषइवभगवान्पावकः।तपोवनदेवतानूपुरानुकारिणाधर्मशासनकटकेनेवस्फाटिकेनाक्षवलयेनदक्षिणश्रवणावलंबि
नाविराजमानःसकलविषयोपभोगनिरस्त्यर्थमुपपादितेनललाटपट्टकेत्रिसर्पेणेवतस्यत्रिपुंड्रकेणालंकृतोगगनमार्गमनोन्मुखबलाका
नुकारिणास्वर्गमार्गमिवोदर्शयितासततस्रुद्भीवेणस्फटिकमणिकमंडलुनाध्यासितवामकरतलःस्कंधदेशावलंबिनाकृष्णाजिनेननी
लपांडुतासातपस्तृष्णानिपीतेनांतर्भक्तिःपूततधूमपटलेनेवपरीतमूर्त्तिरसितनवबिससूत्रनिर्म्मितेनेवपरिलघुतयापवनलोलेननिर्म्मी
सविरलपक्ष्मकपिंजरमिवगणयतावामांसादवलंबिनायज्ञोपवीतेनोद्भासमानोदेवतार्चनार्थमागृहीतवननताकुसुमपरिपूर्णपर्णपु २३

दसनाथसिखरेणआषाढदंडेनव्यापृतसव्येतरपाणिर्विषाणशिखरोत्खाताम्रूद्धहतास्मानमृदश्रुपजातपरिचयेननीवारमुष्टिसंवर्द्धिते
नकुशाकुसुमलतायास्यमानलोलदृष्टिनातपोवनस्थोणाद्ययातोविटपइवकोमलवल्कलावृत्तशरीरोगिरिरिवसमेखलोराकुरिवास
रुदासाढितसोमःपद्मनिकरइवदिवसकरमरीचिपोनदीतटतरुरिवसततजलक्षालनविरलजटःकरिकलभइवविकचकुमुददलशक
लसितदशनःद्रोणिरिवकृपानुगतोनक्षत्रराशिरिवचित्रमृगरूतिकाश्लेषोपशोभितोघ्रुमकालदिवसइवकुपितवदुदोषोद्रुजलधर
समयइवप्रवासितरजःप्रसरोवरुणइवकृतोदवासोहरिरिवापनीतनरकतयःप्रदोषारंभइवसंध्यापिंगलतारकःप्रभातकालइवबाला
तपकपिलःरविरथइवदृढनियमिताक्षचक्रःसुराजेवनिरूढमंत्रसाधनरपितविग्रहोजलनिधिरिवकरालशंखमंडलावनद्धगात्रोभगीर
थइवदृष्टगंगावतारोमधुकरइवासकृदनुभूतपुष्करवनवासोवनचरोपिकृतमहालयप्रवेशःअसंयतोपिमोक्षार्थीसामप्रयोगपरोपिसततं
वलंबितदंडःसुप्तोपिप्रबुद्धःसन्निहितनेत्रद्वयोपिपरित्यक्तवामलोचनःतदेवकमलसरःसिस्नासुरुपागमत्अप्राप्येणाकारणमित्रमप्रतिका

जा
५२:

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं रुणा[illegible]ड्डीशिखस्मदाखस्नवंतिसत्तांचेनांसि।यतःसमंतादृष्टिमालोक्यसमुपजातदयःसमीपवर्त्तिनमृषिकुमारकमन्यतमम्ब्रवीत्॥अयं
२५ कथमपिशुकशिशुरसंजातपक्षपुटएवतरुशिखरादस्मात्परिच्युतःश्येनमुखपरिभ्रष्टेनवानेनभवितव्यंतथाह्यतिदवीयस्तयाप्रपात
स्याल्पशेषजीवितोयमामीलितलोचनोमुहुर्मुहुरुत्फल्वणांश्वसितिमुहुर्मुहुश्चंचुपुटंविवृणोति।नशक्नोतिशिरोधरांधारयितुंतदेहि
यावदेवायमसुभिर्नविमुच्यते।तावदेवंगृहाणमम।अवतारयसलिलसमीपमित्यभिधायतेनमांसरस्तीरमनाययदुपसृत्यचजलसमीप
मेकदेशनिहितदंडकमंडलुरादायस्वयमांमुक्तप्रयत्नमुत्तानितमुखमंगुल्याकतिचित्सलिलविंदूनपाययदंभःक्षोदकृतसेकंचसमुप
जातप्राणमुपतरुपस्थस्यनवनलिनीपलाशस्यजलशिशिरायांछायायांनिधायसमुचितमकरोत्स्नानविधिमभिषेकावसानेऽथप्राणाया
मपूतोजपन्[illegible]वित्राण्यघमर्षणानिष्पत्यप्रैरुस्सुखोरकारविंदैर्नलिनीपत्रपुटेनभगवतेसवित्रेदत्वार्घमुपतिष्ठद्गृहीतधौतधवलवल्क राम
लस्सुसमज्योत्स्नइवसंध्यातपःकरतलनिर्धूननविशदजटःकमंडलुमाश्र्यपञ्चिद्धिनासरोवारिणाप्रत्यग्रस्नानार्द्रजटेनसकलेनतेनमुनिकुमा २५

Digitized by Panjab Digital Library | www.panjabdigilib.org

एकदं वकेनानुगम्यमानो मां गृहीत्वा तपोवनानिमुखः शनैः शनैरगच्छत्तामनतिदूरमिव गत्वा दिशि शमदा संन्निहितकुसुमफलैस्तालति
लकतमालहिंतालवकुलवकुलैरेलालताकुलितनालिकेरीकलापैरालोललोध्रलवलीलवंगपल्लवैरुल्लसितचूतरेणुपटलैरलिकुलझं
कारमुखरसहकारैरुन्मदकोकिलकुलकलालापकोलाहलिभिरुत्फुल्लकेतकमंजरीरजःपुंजपिंजरैः रमीलतादोलाधिरूढवनदेवतैस्तारका
वर्षमिवापवर्गविनाशपिशुनं कुसुममनिकरमनिलचलितमनवरतमतिधवलमुत्सृजद्भिः संसक्तपादपैः काननैरुपरूढमचकितप्रचलि
तकृष्णसारशतशबलातिरुत्फुल्लकमलिनीलोहितीतिमिरीरीचमायाश्मगावलन्नटवीरुद्धनालिर्हाशरबिचापकोटिकृतकंदविषमित
तलात्तिर्द्दडकारण्यस्थलीनिरूपशोभितप्रांतामागृहीतसमित्कुशकुसुमशस्त्रिरध्ययनमुखरशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरम्
न्योपकंठमुत्कंपितशिखंडिमंडलश्रूयमाणजलकलशशब्दमाध्मानमनवरताज्याहुतिप्रीतैश्चित्रभानुभिः सशरीरमेवमुनिजनममरलो
कं निनीषुभिरुह्यमानधूमलेखाकुलेनावध्यमानस्वर्गमार्गगमनसोपानसेतुमिवोपलक्ष्यमाणमाणमासन्नवर्त्तिनीतिस्वपोवनसंपर्कादिवा

Digitized by Panjab Digital Library | www.panjabdigilib.org

पगतकालम्ब्यानिम्नरंगपरंपरासंक्रांतरविबिंबपंक्तिलिप्तापसदर्शनागतसमीर्घमालाविगाह्यमानानिरिवानिविकचकुसुमदवनस्थलि
जनमुपासितुमवतीर्णग्रहगणमिव निशाशृहहंतानिदीर्घिका लिःपरिहृतमनिलावनमितशिखराभिः प्रणम्यमानमिव वनलताभि
रनवरतमुक्तकुसुमैरभ्यर्च्यमानमिव पादपैराबद्धपल्लवांजलिभिरुपास्यमानमिव विटपैरुटजाजिरप्रकीर्णश्यामाकामुपसंगृही। तृश्पा३
तामलकीलवलीकर्कंधूकदलीलकुचचूततालफलमध्ययनमुखरबटुजनमनवरतश्रवणगृहीतवषट्कारवाचालशुककुलमनेका।
सारिकोद्घुष्यमाणसुब्रह्मण्यमरण्यकुक्कुटोपभुज्यमानवैश्वदेवबलिपिंडमासन्नवापीकलहंसपोतभुज्यमाननीवारबलिमेणीजिह्वा
पल्लवोपलिह्यमानमुनिबालकमग्निकार्यार्द्धदग्धसिमिसिमायमानसमित्कुशकुसुमाभुपलतमनालिकेररसस्निग्धशिलातलमचिर
कुसुमवल्कलरसपाटलभूतलं रक्तचंदनोपलिप्तादित्यमंडलकनिहितकरवीरकुसुममितस्ततोविक्षिप्तभस्मलेखाकृतमुनिजनलोजनर
मिपरिहारांपरिचितशाखामृगकराकृष्टयष्टिनिष्क्राश्यमानप्रवेश्यमानजरदंधतापसमिसकलसकार्द्धोपभुक्तपतितैःसरस्वतीमुजलता। २५

Digitized by Panjab Digital Library | www.panjabdigilib.org

विगलितैः शंखवलयैरिव मृणालशकलैः कल्माषितमृषिजनार्थमेणकैर्विषाणशिखरोत्खन्यमानविविधकंदमूलमंबुपूर्णपुष्करपुटैर्वनक
रिणिभिरासिच्यमानाविरलालवालकमृषिकुमारकाकृष्यमाणवनवराहदंष्ट्रांतरालग्नशालूकमुपजातपरिचयैः कलापिभिः पक्षपुटपवनसं
धुक्ष्यमाणमुनिहोममुहुताशनमारब्धामृतचरुचारुगंधमर्धपक्वपुरोडाशसुगंधपरिमलामोदितमविछिन्नाहुतिधाराहुतिजनितधुंकारमुखरितमु ५३
पचर्यमाणातिथिवर्गंपूज्यमानपितृदैवतमर्च्यमानहरिहरपितामहमुपदिश्यमानश्राद्धकल्पंव्याख्यायमानयज्ञविद्यमालोच्यमानधर्मशा
स्त्रंवाच्यमानविविधपुस्तकंविचार्यमाणसकलशास्त्रार्थमारभ्यमाणपर्णशालमुपलिप्यमानाजिरमपमृज्यमानोटजाभ्यंतरमाबध्यमानध्यानं
साध्यमानमंत्रमभ्यस्यमानयोगमुपहियमाणवनदेवताबलिंनिर्वर्त्यमानमौंजमेखलंक्षाल्यमानवल्कलमुपसंगृह्यमाणसमिधमुपसंस्क्रियमा
णकृष्णाजिनंगृह्यमाणगवेधुकंशोष्यमाणपुष्करबीजग्रथ्यमानाक्षमालंन्यस्यमानवेत्रदंडमदृष्टपूर्वकलिकालस्यापरिचितमनृतस्याश्रुतपूर्व
मनंगस्याज्ञयोनिमिवत्रिभुवनवंदितमसुरारिमिवप्रकटितहरिवराहरूपंसांख्यमिवकपिलाधिष्ठितंमथुरोपवनमिववनावलीढदर्पितधेनु

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं
२६

कं उदयनमिवानंदितवत्सकुलं किंपुरुषाधिराज्यमिव मुनिजनगृहीतकलशासिच्यमानद्रुमं निदाघसमयावसानमिव प्रत्यासन्नजल
प्रपातं । जलधरसमयमिव वनगहनमध्यसुखसुप्तहरिं हनूमंतमिव शिलाशकलप्रहारसंचूर्णिताक्षास्थिसंचयं खांडवविनाशोद्यतार्जु
नमिव प्रारब्धाग्निकार्यं सुरभिविलेपनधरमपि सततविसृतहव्यधूमगंधं मातंगकुलाध्यासितमपि पवित्रं उल्लसितधूमकेतुमपि प्रशांतो
पद्रवं परिपूर्णद्विजपतिमंडलमनाथमपि सदासन्निहिततरुगहनांधकारं अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यं । यत्र च मलिनता
हविर्धूमेषु न चरितेषु मुखरागः शुकेषु न कोपेषु तीक्ष्णता कुशाग्रेषु न स्वभावेषु । चंचलता कदलीदलेषु न मनस्सु चक्षूरागः कोकिलेषु न प
रकलत्रेषु कंठग्रहः कमंडलुषु न सुरतेषु मेखलाबंधो व्रतेषु न ईर्ष्याकलहेषु । स्तनस्पर्शो होमधेनुषु न कामिनीषु पक्षपातः कृकवाकुषु न विद्या
विवादेषु भ्रांतिरनलप्रदक्षिणासु न शास्त्रेषु वसुसंकीर्तनं दिव्यकथासु न तृष्णासु गणना रुद्राक्षवलयेषु न शरीरेषु मुनिबालनाशः क्रतुदीक्ष २६
या न मृत्युना । रामानुरागो रामायणेन न यौवनेन मुखभंगविकारो जरया न धनाभिमानेन । यत्र च महाभारते शकुनिवधः । पुराणे वायुप्रलपि

तं वयःपरिणामे द्विजपतनं। उपवनचंदनेषु जाड्यं। अग्नीनां भूतिमत्वं। एणकानां गीतव्यसनं। शिखंडिनां नृत्यपक्षपातः भुजंगानां भो
गः कपीनां। श्रीफलाभिलाषः मूलानामधोगतिस्तस्य चैवंविधस्य मध्यभागे मंडलमलंकुर्वाणस्य अलक्तकालोहितपल्लवस्य मुनिजना
लंबितकल्माषाजिनजलकरकमनाथ्यशाखस्य तापसकुमारिकाभिर्ललतागदत्तपीतपिष्टपंचांगुलस्य हरिणशिशुभिरापीयमानाल
वालकसलिलस्य मुनिकुमारकाबद्धकुशचीरदाम्नो हरितगोमयोपलेपनविविक्ततलस्य तत्क्षणाकृतकुसुमोपहाररमणीयस्य ना
तिमहतः परिमंडलतया विस्तीर्णावकाशस्य रक्ताशोकतरोश्छायायामुपविष्टमत्युग्रतपोभिर्भुवनमिव सागरैः कनकगिरिमिव
कुलपर्वतैः क्रतुमिव वैतानवह्निभिः कल्पांतदिवसमिव रविभिः कालमिव कल्पैः समंतान्महर्षिभिः परिवृतं उग्रशापतितयेव कंपित
देहया प्रणायिन्येव विहितकेशग्रहया क्रुद्धयेव कृतभ्रूभंगया मत्तयेवाकुलिगमनया प्रसाधितयेव प्रकटिततिलकया जरया गृहीतव्र
तयेव तस्मिन्नवलग्नया धवलीकृतविग्रहमायामिनीभिः पलितपांडुराभिस्तपसा विजितमुनिजनमखिलं धर्मपताकाभिरिवोच्छ्रिताभिर

Digitized by Panjab Digital Library | www.panjabdigilib.org

मरलोकमारोढुं पुण्यरज्जुभिरिवोपसंगृहीताभिरतिदूरप्ररूढस्य पुण्यतरोः कुसुममंजरीभिरिवोद्गताभिर्जटाभिरुपशोभमानं उप
रचितभस्मत्रिपुंड्रकेण तिर्यक्प्रवृत्तत्रिपथगास्रोतस्त्रयेणेव हिमगिरिशिलातलेन ललाटफलकेनोपेतं अधोमुखखंडकलाकाराया
मवलंबितवलिशिथिलायां भ्रूलतायामवष्टभ्यमानदृष्टिं अनवरतमंत्राक्षराभ्यासविवृत्ताधरपुटतया निःपतद्भिरतिस्वच्छैः सततप्र
प्ररोहैरिव शुद्धेंद्रियवृत्तिभिरिव विद्याभिरिव करुणारसप्रवाहैरिव दशनमयूखैर्धवलितपुरोभागं उद्वमदमलगंगाप्रवाहमिव जा
ह्नुं अविरतसोमोद्गारसुगंधिनिःश्वासावकृष्टैर्भ्रमद्भिरिव शापाक्षरैः सदा मुखमागमन्निविष्टैः परिस्फुरद्भिरलिभिरविरहितं अतिकृ
शतया निम्नतरगंडगर्त्तं उन्नततरहनुघोणास्थिकरालतारकं अवशीर्यमाणविरलनयनपक्ष्ममालं उद्गतदीर्घरोमरुद्धश्रवणविवरं राम
आनाभिलंबकूर्चकलापमाननं आदधानं अतिचपलानामिंद्रियाश्वानामंतःसंयमनरज्जुभिरिवाततताभिः कंठनाडीभिर्निरंतरसंवद्ध २७
कंधरं समुन्नतविरलास्थिपंजरमंसावलंबिविषवलयज्ञोपवीतमनिलवशाज्जनिततरंगतरंगमुत्प्लवमानमृणालमिव मंदाकिनी

Digitized by Panjab Digital Library | www.panjabdigilib.org

प्रवाहमकल्मषमंगास्रुद्वहंतंअमलस्फटिकशकलघटितमक्षवलयमुज्वलस्थूलमुक्ताफलग्रथितंसरस्वतीहारमिवचलदंगुलिविवरांतमाव
र्तयंतंअनवरतभ्रमिततारकाचक्रमपरमिवध्रुवंउन्नमिताशिराजालकेन जरत्कल्पतरुमिवपरिणतलतासंचयेननिरंतररचितंअमलेन
चंडांशुभिरिवाश्रितफेनैरिवशणसंतानतंतुभिरिवनिर्मितेनमानससरोजलक्षालितशुचिनादुकूलवल्कलेनाद्वितीयेनेवजराजालकेनसं
छादितंआसन्नवर्तिनामंदाकिनीसलिलपूर्णेनत्रिदंडोपविष्टेनस्फटिककमंडलुनाविकचपुंडरीकराशिमिवराजहंसेनोपशोभमानंअच
लानांस्थैर्येणगांभीर्येणसागराणांतेजसासवितुःप्रशमेनशुवीक्षतिनिर्मलतयांबरतलस्यसंविभागमिवकुर्वाणंवैनतेयमिवस्वप्रतापोपात्तम
कलद्विजाधिपत्यंकमलासनमिवाश्रमगुरुंजरच्चंदनतरुमिवभुजगनिर्मोकधवलजटालंप्रशान्तवारण[illegible]मिवपलवकर्णतालंबृह
स्पतिमिवजन्मसंवर्द्धितकचंदिवसमिवोद्यदर्कबिंबंसावरखुरवंशरत्कालमिवक्षीणवर्षंशांतनुमिवप्रियसत्यव्रतंअंबिकाकरतलमिवरुद्रा
क्षग्रहणनिपुणंशिशिरसमयसूर्यमिवकृतोत्तरासंगंवडवानलमिवसततपयोलक्षंशून्यनगरमिवदीनानाथविपन्नशरणंपशुपतिमिवभस्म

कादं पांडुरोमाश्लिष्टशरीरंभगवंतंजावालिमपश्यं।अवलोक्यचाहमचिंतयं।अहोप्रभावस्तपसां।इयमस्यशांतापिमूर्त्तिरुत्तप्तकनकावदातापरिस्फु
२८ रंतीसौदामिनीवचक्षुषःप्रतिहंतितेजांसि।सततमुदासीनापिमहाप्रभावतयात प्रमिवोपजनयतिसाध्वसमोपगतस्यशुष्कनलकाशकुसुम
निपतितानलचटुलवृत्तिनित्यमसहिष्णुतपस्विनांतनुतपसामपितेजःप्रकृत्याभवति।किमुतसकलभुवनतलवंदितचरणानामनवरतत
पःक्षपितमलानांकरतलामलकवदखिलंजगदालोकयतांदिव्येनचक्षुषाभगवतामेवंविधानामघक्षयकारिणांपुण्यानिनामग्रहणान्यपिम
हामुनीनांकिंपुनर्दर्शनानि।धन्यमिदमाश्रमपदमयमधिपतिर्यत्र।अथवाभुवनतलमेवधन्यमनेनाधिष्ठितमवनितलकमलयोनिना।पुण्य
वंतःखल्वमीमुनयोयदहर्निशमेनमपरमिवनलिनासनंअपगतान्यव्यापाराःसुखावलोकननिश्चलदृष्टयःपुण्याःकथाःशृण्वंतःसमुपासते।
सरस्वत्यपिधन्यायावसततमतिप्रसन्नेकरुणाजलनिष्यंदिन्यगाधगांभीर्येऽतिविरहितद्विजपरिवारमुखकमलेसंपर्कमुज्ज्वलवंतीनिवसतिहंसीवमा राम
नसे।चतुर्मुखमुखकमलवासिभिर्वेदैःसुचिरादिवद्वितीयमिदमपरमुचितमासादितंस्थानं।एनमासाद्यशरत्कालमिवकलिजलदसमयकलु २८

Digitized by Panjab Digital Library | www.panjabdigilib.org

षिताःप्रसादमुपगताःपुनरपिजगतिसर्वे तइवसर्वविद्याःनियतमिहसर्वात्मनाकृतावस्थितिर्नालगवतापरिश्रुतकलिकालविलसितेन
धर्मेणनस्पृष्टंतेरूत्तमुगस्याचरणितलमनेनाधिष्ठितमालोक्यनवहतिन्नूनमिदानींसप्तर्षिमंडलनिवासाभिमानमंवरतलं।अहोमहासत्वेयंजरा
यास्यप्रलयरविरश्मिनिकरदुर्निरीक्ष्येजटाभारेफेनपुंजधवलागंगेवपशुपतेःक्षीराकृतिरिवशिखाकलापेविलासवसोर्निपतंतीनलीता।बहलाज्य
धूमपटलमलिनमस्यभगवतःप्रसादादीप्तमपिवरविकिरणजालमपिहरतःपरिहरतितपोवनं।एतेचपवनलोलशिखाकलापरचितांजलय
इवाश्रमेतप्रतानिहवींषिप्रतिगृह्णंतिपतत्रीत्याशुशुक्षणयः।तरलिततरुकूलवल्कलोयंचाश्रमलताकुसुमसुरभिपरिमलोमंदसंचारीसशंकइ
वास्यसमीपमुपसर्पतिगंधवाहः।प्रायोमहाभूतानामपिदुरतिलंघनीयस्यतेजोराशिसर्वतेजस्विनामयंचायम्णाद्विदूरयमिवाभातिजगदनेना
धिष्ठितंमहात्मनानिःकंपेवक्षितिरेतदवष्टंभादेषप्रवाहःकरुणारसस्यसंतरणसेतुःसंसारसिंधोःआधारःक्षमांभसांपरशुस्तृष्णालतागहनस्यसा
गरःसंतोषामृतरसस्यउपदेष्टासिद्धिमार्गस्यअस्तगिरिरसद्ग्रहस्यमूलमुपशमतरोर्नाभिःप्रज्ञाचक्रस्यस्थितिवंशोधर्मध्वजस्यतीर्थंसर्वविद्यावता

Digitized by Panjab Digital Library | www.panjabdigilib.org

रागाणांवडवानलोलोभार्णवस्यनिकषोपलःशास्त्ररत्नानांदावानलोरागपल्लवस्यमहामंत्रःक्रोधभुजंगस्यदिवसकरोमोहांधकारस्यअर्गलाबं
धोनरकद्वाराणांकुलभवनमाचाराणामायतनंमंगलानामभूमिर्मदविकाराणांदर्शकःसत्पथानामुत्पत्तिःसाधुतायानेमिरुत्साहचक्रस्या
श्रयःसत्वस्यप्रतिपक्षःकलिकालस्यकोशस्तपसःसखासत्यस्यक्षेत्रमार्जवस्यप्रभवःपुण्यसंचयस्यादत्तावकाशोमत्सरस्यारातिर्विपत्तेःअस्था
नंपरिभूतेरननुकूलोभिमानस्यासंमतोदैन्यस्यअवशोविषयाणामनभिमुखःसुखानां।अस्यभगवतःप्रसादादेवोपशांतवैरमपगतमत्सरं
तपोवनं।अहोप्रभावोमहात्मनां।अत्रहिशाश्वतिकमपहायविरोधमुपशांतात्मानस्तिर्यंचोपितपोवनवसतिसुखमनुभवंतिविकचोत्पल
वितानानुकारिणमुत्पतच्चारुचंद्रकशतंहरिणलोचनद्युतिशबलमतिनवशाद्वलमिवविशतिशिखिनःकलापमातपाहतोनिःशंकमहिः।अ
यमुत्सृष्टमातरमजातकेसरंकेसरिशिशुस्तिःसहोपजातपरिचयप्रस्नुतस्तनीक्षीरधारामापिबतिकुरंगशावकःसिंहस्तनंपक्षमृणालाशंकिभिःश
शिकरधवलंसटाभारमामीलितलोचनोवजम्भ्यतेद्विरदकलभैराकृष्यमाणंमृगपतिःइदमिहकपिकुलमपगतचापलमुपनयतिमुनि २९

Digitized by Panjab Digital Library | www.panjabdigilib.org

कुमारकेभ्यः स्नातेभ्यः फलानिप्रतेनचनिवारयतिमदांधा अपिगंडस्थलीसोज्झितमदजलपाननिश्चलानिमधुकरकुलानिज्ञातदया।
कर्णतालैःकरिणाःकिंवजनानातपसाग्निहोत्रधूमलेखासिरुत्सर्पंतीतिरतिशयपवादितरूप्राजिनोन्नरासंगशोभाःफलमूलभृतो
वल्कलिनोनिश्चेतनाअपरवोपिसनियमाःखलक्ष्यंते ऽस्यतपोवनःकिंपुनःसचेतनाःप्राणिनइतिएवंचिंतयंतमेवमांतस्यामेवाशोकत
रोरधछायायामेकदेशेस्थापयित्वासचपादावुपसंगृह्यकृताभिवादनःपितुरनतिसमीपवर्तिनिकुशासनेसमुपाविशत्।आलोक्य
तुमांतेसर्वएवमुनयःकुतोयमासादितस्तपस्वीतितमासीनमपृच्छन्सोस्तुतानब्रवीत्।अयंमयास्नातुमितोगतेनकमलिनीतीरतरुनी
डनिपतितःशुकशिशुरातपजनितक्लांतिरुत्तप्तपांशुपटलमध्यगतोदूरनिपतनविह्वलतनुरल्पावशेषायुरासादितस्तपस्वी।दुरारोहतया
तस्यवनस्पतेर्नशक्यतेस्वनीडमारोपयितुमितिज्ञातदयेनानीतस्तद्यावदयमप्ररूढपक्षतिरक्षमोंतरिक्षमुत्पतितुंतावदत्रैवैकस्मिन्नाश्र
मतरुकोटरेमुनिकुमारकैरस्मादृशैरुपनीतेननीवारकणनिकरेणफलरसेनचसंवर्धमानोधारयतुजीवितं।अनाथपरिपालनंहिधर्मो

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्माद्धि धाम्ना सुद्धिन्नपक्षति क्रमागगनतलसंचरणसमर्था यास्यति। यत्रास्मै रोचिष्यते। इहैव वोपजातपरिचयः स्थास्यतीत्येवमादिकमस्मत्सं
वर्द्धमालापमाकर्ण्य किंचिदुपजातकौतूहलो भगवान्जाबालिरीषदावलितकंधरः स्वप्रपन्नैः प्रक्षालयन्निव मामतिप्रशांतया दृष्ट्या सु।
चिरमुपजातप्रत्यभिज्ञान इव पुनः पुनर्विलोक्य स्वस्यैवाविनयस्य फलमनेनानुभूयत इत्यवोचत्। स हि भगवान्कालत्रयदर्शी तपःप्रभा।
वाद्दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगदवलोकयति। वेत्ति जन्मान्तराण्यतीतानि कथयत्यागामिनमप्यर्थं ईक्षणगोचरगता
नां च प्राणिनामायुषः प्रमाणमावेदयति। ततः सर्वैव सा तापसपरिषच्छ्रुत्वा विदिततत्प्रभावा कीदृशोऽनेनाविनयः कृतः किमर्थं वा कृतः॥
क्व वा कृतो जन्मान्तरे कोयमासीदिति कौतूहलिन्यभवत्। उपनाथितवती च तं भगवन्तमावेदय प्रसीद भगवन्कीदृशस्याविनयस्य फल
मनेनानुभूयते क एष चासीज्जन्मान्तरे विहगजातौ च कथमस्य संभवः किमभिधानो ऽयमपनयतु नः कौतूहलमाश्चर्याणां हि सर्वेषां भगवान् ३०
प्रभव इत्येवमुपयाच्यमानस्तपोवनपरिषदा महामुनिः प्रत्यवदत्। अतिमहदिदमाश्चर्यमाख्यातव्यमल्पशेषमहः प्रत्यासीदति च नः।

Digitized by Panjab Digital Library | www.panjabdigilib.org

२

स्नानसमयोऽलवतामप्यतिक्रामतिदेवार्चनविधिवेलातदुत्तिष्ठंतुभवंतःसर्वएवतावदाचरंतुयथोचितंदिवसव्यापारमपरासमयेल
वतोस्तुरःकृतमूलफलाशनानांविश्रांतोपविष्टानामादितःप्रभृतिसर्वमावेदयिष्यामियोयंयथानेनकृतमिहवलोकेयथास्यसंभूतिरयंच
तावदपगतक्लमःक्रियतामाहारेणनियतमयंमयापृष्टोजन्मांतरोदंतंस्वप्नोपलब्धमिवमयिकथयतिसर्वमशेषतःस्मरिष्यतीत्यसिदवदे
वोत्थायसहमुनिभिःस्नानादिकमुचितंदिवसव्यापारमकरोत् ।अनेनचसमयेनपरिणतोदिवसःस्नानोत्थितेनमुनिजनेनार्घविधिमुप
पादयताक्षितितलेदत्तमंबरतलगतंसाक्षादिवरक्तचंदनांगरागंरविरुद्वहत् ।ऊर्ध्वमुखैरर्कबिंबविनिहितदृष्टिभिरूष्मपैस्तपोधनैरि
वपरिपीयमानतेजःप्रसरोविरलातपोदिवसस्यावसानमलसत् ।उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षयेवसंहृतपादःपारावतचरणपा
टलरागोरविरंबरतलादलंबत ।आलोहितांशुजालंजलशयनगतस्यमधुलिदोविशालमक्षधारमिवनाभिनलिनंप्रतिमागतमपरा
र्णवेरविमंडलमलक्ष्यतविहायचगणाग्रमुच्यकमलिनीवनानिशकुनयदिवसावसानेतपोवनतरुशिखरेषुपर्यवर्त्तंतेभ्रमरविकिर

कादं
३१

णाः क्षितिमकुर्वश लग्नरक्तातपच्छेदा मुनिभिरालंबितलोहितवल्कला इवाश्रमतरवः क्षणमदृश्यंत। अस्तमुपगते च भगवति सहस्रदी-
धितावपरार्णवतटादुल्लसन्ती विद्रुमलतेव पाटला संध्या समदृश्यत। यस्यामाबध्यमानध्यानमेकदेशे दुह्यमानहोमधेनुधाराध्वनिम-
नोहरमग्निहोत्रवेदीषु विकीर्यमाणहरितकुशमृषिकुमारिकाभिरितस्ततो विक्षिप्यमाणदिग्देवताबलिसिक्थमाश्रमपदमभवत्। क्वापि विहृ-
त्य दिवसावसाने लोहिततारका तपोवनधेनुरिव कपिला परिवर्तमाना संध्या मुनिभिरदृश्यत। अचिरप्रोषिते सवितरि शोकविधुरा कमलमु-
कुलकमंडलुधारिणी हंससितदुकूलपरिधाना मृणालधवलयज्ञोपवीतिनी मधुकरमंडलाक्षवलया कमलिनी दिनपतिसमागम-
व्रतमिवाचरत्। अपरसागरांभसि पतिते दिवसकरे पतनवेगोत्क्षिप्तसलिलशीकरनिकरमिव तारागणमंबरतलमधारयत्। अचिरात्सिद्धकन्य-
काविक्षिप्तसंध्यार्चनकुसुमशबलमिव तारकितं वियदराजत। क्रमेण चोर्ध्वमुखेन मुनिजनेनोर्ध्वविप्रकीर्णप्रणामांजलिसलिलैः क्षाल्यमा- राम
न इवागलदखिलः संध्यारागः। क्षयमुपगतायां संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममसितं वहन्त्या- ३१

श्रा प. त्रि येवा

Digitized by Panjab Digital Library | www.panjabdigilib.org

तनुतिमिरतमालवनलेखसप्तर्षिमंडलाधुषितमरुंधतीसंचरणपवित्रमुपरितोखाढमालक्ष्यमाण
मूलमेकोत्तस्थित २

पहायमुनिजनहृदयानिसर्वमच्यदंधकारतांतिमिरमनयत्क्रमेणचरविस्नानमुपातस्फदंतमुपलरूपज्ञानवैराग्यपोदौतडरूलवल्कलधव
लोवरःसंतानातंतःउरःपर्यंतछिन्नचारुतारकमृगगममरलोकाश्रममिवगगनतलमस्तदीधितिरध्यतिष्ठत्चंद्रमाअरुणस्तताराकाकपालशका
लालंकृतादंबरतलाद्भवकोत्रमांगादिवगंगाभागारमासरयंतीहंसधवलाधरणपामपतंबालंचंडिकाहिमकरसरसिविकचपुंडरीकसितेचं
डिकाजलपानलोलादवतीर्णानिश्चलमूर्तिरन्तपंकलमरवाहश्यतहरिणाःतिमिरजलधरसमयापगमेनंतरमानिनवमितसिंडवारकुसुमपां
डुरेगगनागतैगात्यंतहंसैरिवकुमुदसरांसिचंडपादैःविगलितसकलोदयरागांरजनिकरबिंबमम्बरापगावगाहनक्षोभसिंदूरमैरावतकुंभस्थल
मिवतत्क्षणमवालोक्यताशनैःशनैश्चहूरोदितेभगवतिहिमरूचितिमुधाधवलिपटलेनेवधवलीकृतेचंद्रातपेनजगत्यवश्यायजलबिंदुपतनमंदायाति
मुविघटमानकुमुदखंडकषायपरिमलेमुसमुपोढनिद्रालसतारलकैरस्योन्मुग्रथितपक्ष्मसुरैरास्वहूरोमंथमंथरमुखरवैःमुखासीनैराश्रममृ
गैरभिनंदितागमनेमुप्रवर्त्तमाननिशावसानमारणेधहृदयाममताज्ञावाचडितायाविनावर्यीहारानःप्रजोहारमामामदायसर्वैःसहमुनिभिरुपस्थत्य

रुताहारंच

Digitized by Panjab Digital Library | www.panjabdigilib.org

यव पं८

कादं वंशजातपोज्ञासिनितपोवनैकदेशेवेत्रासनोपविष्टमतिदूरवर्तिनाजालपादम्लाशिष्येणदत्तपवित्रैपाणिनामदैस्नुपवीज्यमानंपितरमवो
३२ चत्तातानसकलेयमाश्चर्यश्रवणाकुतूहलाकलितहृदयासमुपस्थितातापसपरिषदावद्धमंडलाप्रतीक्षतेव्यपनीतश्रमश्चकृतोयंपतत्रिपोत
स्तदावेद्यतामनेनकृतमपरस्मिन्जन्मनिकोवायमस्मूत्विषगतिवेतिएवमुक्तस्महामुनिरग्रतःस्थितंमामवलोक्यतांश्चसर्वानेकाग्रान्श्रवण
परान्सुनीन्उद्वाशनैरवधीत्।श्रूयतांयदिकौतूहलंअस्तिसकलत्रिभुवनललामभूताप्रसवभूमिरिवकृतयुगस्यआत्मनिवासोचितामगव
तामहाकालाभिधानेनभुवनत्रयसर्गस्थितिसंहारकारिणाप्रमथनाथेनापरेवपृथिवीसमुत्पादिताद्वितीयपृथिवीशंकयाबजलनिधिनेवरसा
तलगंगतीरेणजलपरिखावलयेनपरिवृतापशुपतिनिवासप्रीत्यागगनतलोल्लेखिशिखरमालेनकैलासगिरिणेवसुधासितेनप्राकारमंडलेनप
रिगताप्रकटशंखशुक्तिमुक्ताप्रवालमरकतमणिराशिभिश्चामीकरचूर्णवालुकानिकरनिचितैराकल्पपरिपीतसलिलैःसागरैरिवमहाविपणि
पथैरुपशोभितासुरासुरसिद्धगंधर्वविद्याधरोरगाध्यासिताभिश्चित्रशालाभिरविरतोत्सवप्रमदावलोकनकुतूहलादंबरतलावती ३२

णीभिर्दिव्यविमानपंक्तिभिरिवालंकृताम्मथनोद्धृतदुग्धधवलितमंदरद्युतिभिः कनकमयामलसारकलशशेखरैरनिलदोलायितसितध्वजै
रुपरिपतद्गंगैरिव तुषारगिरिशिखरैर्मंदिरैर्विराजिता शृंगाटकाश्चावेदिकोपशोभिनोदपानैरनवरतचलितजलघटीयंत्रसिच्यमानह
रितोपवनांधकारैः केतकीधूलिधूसरैरुपशल्यकैर्विभूषिता मदमुखरमधुकरपटलांधकारितनिःकुटा स्फुरदुपवनलतापरिमलसुरभिसमी
रणा रणितलोलघंटैरुदितांशुकपताकैरावद्धरक्तचामरैर्विद्रुममयैः प्रतिभवनमुच्छ्रितैर्मकरांकैर्मदनयष्टिकेतुभिः प्रकाशितमकरध्व
जपूजा सततप्रवृत्ताध्ययनध्वनिधौतकल्मषा श्लिमितमुरजरवगंभीरगर्जितेष्वसलिलसीकरासारस्रवकरचितदुर्दिनेष्वपर्यस्तरविकिरणार
चितसुरचापचारुषु धारागृहेषु मत्तमयूरैर्मंडलीकृतशिखंडैः प्रांशुवृक्षसनिलिराबध्यमानकेकाकोलाहला विकचकुवलयकांतैरुत्फुल्लकुमुद
धवलोदरैरनिमिषदर्शनमरणीयैराखंडललोचनैरिव सहस्रसंख्यैः सद्भासिता सरोभिरविरलकदलीवनकलिताभिरमृतफेनपिंडपांडुराभि
र्दिशि दिशि दंतवलभिकाभिर्धवलीकृता यौवनमदमत्तमालवीकुचकलशलुलितसलिलया भगवतो महाकालस्य शिरसि सुरसरितमालोक

कार्द
३३

समुपजातेर्ष्यामिसमंततावद्धतरंगभ्रूकुटिरेखपारवमिवक्षालयंत्यासिप्रवाहिस्यापरिहितासकलभुवनख्यातयशसहरजटाचंद्रेणेवकोटि
सारेणामैनाकेनेवाविदितपक्षपातेनमंदाकिनीप्रवाहेणेवप्रकटितरक्तपद्मरागराशिनास्मृतिशास्त्रेणेवसमावसथकूपप्रपारामसुरसदन
सत्रप्रवर्त्तकेनमंदरेणेवोद्धृतसमस्तसागररत्नसारेणसंगृहीतगारुडेनापिभुजंगसंगभीरुणाकलोपजीविनापिप्रणयिजनेनोपजीव्यमानवि
भवेनवीरेणापिविनयवताप्रियंवदेनापिसत्यवादिनाभिरूपेणापिस्वदारसंतुष्टेनाप्रतिभिन्नजनस्यागमार्थिनापिपरस्वार्थनानभिज्ञेनका
मार्थपरेणापिधर्मप्रधानेनमहासत्वेनापिपरलोकभीरुणासकलविज्ञानविशेषविदावदान्येनदक्षेणास्मितपूर्वाभिभाषिणापरिहासालाप
पेशलेनोज्ज्वलवेषेणशिक्षिताशेषदेशभाषेणवक्रोक्तिनिपुणेनआख्यायिकाख्यानपरिचयचतुरेणसर्वलिपिविज्ञेनश्रुतमहाभारतपुराणे
नरामायणानुरागिणाबृहत्कथाकुशलेनद्यूतादिकलाकलापपारगेणश्रुतरागिणासुभाषितव्यसनिनाप्रशांतेनसुरसिमाससमाचत्तेनेवसतत
दक्षिणेनहिमगिरिकाननेनेवांतःसरलेनलक्ष्मणेनेवरामाराधननिपुणेनशत्रुघ्नेनेवाविच्छिन्नतरत्नपरिचयेनदिवसेनेवमित्रानुवर्त्तिनावोढ्रेन

परिहासपे
शलेन

राम
३३

लिपि ३

वसर्वदानास्तिवादशून्येनसांख्यागमेनेवप्रधानपुरुषोपेतेनजिनधर्म्मेणेवजीवानुकंपिनाविलासिजनेनाधिष्ठितासशैलेवप्रसा
दैःसशाखानगरेवमहाभवनैःसकल्पवृक्षेवसत्पुरुषैर्दर्शितविश्वरूपेवचित्रभित्तिभिःसंध्येवपद्मरागानुरागेणअमराधिपमूर्त्तिरिवम
खशतानलधूमपूतापशुपतिलास्यक्रीडेवसुधाधवलाट्टहासाहृष्टेवजातरूपरुच्या।गौडभूर्त्तिरिवाकृतस्थितिरमणीयाप्रलानवेलेव
प्रवृद्धसर्वलोकाशयरवसतिरिवावलंबितचारुचामररत्नागारंतधवलगृहाशेषतनुरिवसदासन्नवसुधाधराजलधिमथनवेलेवमहा
ब५ घोंष्ठूरितदिगंतराप्रस्फुतालिपेकभूमिरिवसंनिहितकनकघरसहस्राडुर्गेवमहासिंहासनोपितमूर्त्तिःअदितिरिवदेवकुलसहस्र
सेव्यामहावराहलीलेवदर्शितहिरण्याक्षपाताकद्रूरिवानंदितभुजंगलोकाहरिवंशकथेवानेकबालक्रीडारमणीयाप्रकटागनोपनो।
गणापणखंडितचरित्रारक्तवर्णापिसुधाधवलाप्रलंबितमुक्ताकलापापिविहारभूषणावज्रप्रकटानिरपिस्थिराविजितामरलोकद्युति
रवंतिषुउजयिनीनामनगरी।यस्यामुत्तुंगसौधोत्संगसंगिनीनामंगनानांमतिमधुरेणगीतरवेणाकृष्यमाणोभोसरवरथतुरंग

कादं पुरःपर्यस्तरथपताकापटःकृतमहाकालप्रणामइवप्रतिदिवसमालक्ष्यतेभगवानुष्णांशुमाली।यस्यांचसंध्यारागारुणाइवसिंदूरकु
३४ ट्टिमेषुप्रारब्धकमलिनीपरिमिलनाइवमरकतवेदिकासुगगनतलप्रसृताइववैडूर्यमणिभूमिषुतिमिरपटलविघटनोद्यताइवकृष्णा
गुरुधूममंडलेषुअभिलषिततारकापंक्तयइवमुक्ताप्रालंबेषुविकचकमलजुषइवनितंबिनीमुखेषुप्रसन्नाचंद्रिकामध्यपतिताइव
स्फटिकभित्तिषुलग्नाइवगगनसिंधुतरंगावलंबिनइवसितपताकांशुकेषुपल्लविताइवसूर्यकांतोपलेषुराहुग्रस्ताइवकहरप्रविष्टाइवप्र
नालवातायनविवरेषुविराजंतेरविगभस्तयः।यस्यांचत्रपजाततिमिरत्वाद्विघटितचक्रवाकमिथुनाव्यर्थीकृतप्रदीपाःसंजातम
दनानलदिग्दाहाइवकामिनीनांस्तनप्रणयकलहलिवीलानतपपिंजरारत्नश्रियः।यांचसन्निहितविषमनोत्वनामनवरतमभिमक्षरोरतिप्रलाप
इव।प्रसर्पन्मुखरीकरोतिमकरकेतुदाहहेतुभूतोभवनकलहंसकुलकोलाहलः।यस्यांचनिशिनिशिपवनविलोलैर्दुकूलपल्लवैरु राम
ल्लसद्भिर्मालिनीषुखकमलकांतिलंघितस्पंदोःकलंकमिवापनयंतोऽहरहःप्रसारितोर्द्ध्वध्वजभुजाःप्रासादालक्ष्यंते।यस्यांचसौधशिखरि ३४

शायिनीनांपर्यप्तसुखानिपुरसुंदरीणांमदनपरवशस्खपतितःप्रतिमाकुलेनउठतिवहलचंदनरससेकशिशिरेषुमणिकुट्टिमेषु
शशलांछनःयस्यांचनिशावसानप्रबुद्धस्यतारतरमपिपठतःपंजरगताःशुकसारिकासदृहस्यालिखितगृहमारसकृतेनविप्लारिणा।
विलासिनीभूषणरवेणविलोभ्यमानानाप्यर्थीनवंतिप्रलातमंगलगीतयःयस्यांचनिवृत्तिर्मणिप्रदीपानांअंतस्मरलताहाराणांअवष्टिनिः
संगीतगृहजघनीनांद्वंद्वविद्योगभुज्ञानांवर्णपरीक्षाकथकानांअवष्टिरलंभजातानांमिवदृषःऊर्ध्वदानांकोशगर्भिरसानांकिंवऊनाय
स्यांभुराष्टरचूडामणिमरीचिविलिखितचरणानखमरुरचोनिशितशूलदारितांधकमहासुरोगौरीनूपुरकोटिघृष्टशेषचंडकलशःत्रिपुर २९
लस्मरजःकृतागारगोमकरध्वजध्वंसविक्षुरयारत्पाप्रसादयंत्याप्रसारितकरसुगविगलितवलयनिकराञ्चितचरणतलेअकृत्यानल।
शिखाकलापकपिलजटाभारतांतसुरभिंकरंधकारातिलगवानुत्सृष्टकैलासवासप्रीतिमहाकालाभिधानःस्वयंनिवसति।तस्यांचै
वंविधायांनगरभवयपातिर्षकंभुमाररचरतलगारथप्रतिमोऽजवलोपार्जितभूमंडलःफलितशक्तित्रयोमतिमांउत्साहसंपन्नोनीतिशा

नवुब२

Digitized by Panjab Digital Library | www.panjabdigilib.org

का०दं०
३५ श्राखिन्नबुद्धिरथोत्तमर्मशास्त्रस्तीयस्त्वनेजमाकांतपावश्यर्याविंदममोरनेकसमंतंतंभूतश्चनिरूपशमितसकलजगउपप्लवोविहाय प्र०
कमलवनाच्यवगणाथनारायणवक्षः स्थलवसतिश्रस्वस्तुरूलारविंदहस्तयाश्चरसमागमैकव्यसनिन्यानिर्य्याजमालिंगितोलक्ष्म्याम
हा स्तुनिजजनसंसेवितस्यमकरन्दनचरणास्वस्वरसरित्ववाहस्यप्रतवःसत्यस्यशिशिरस्यापिरिपुजनसंतापकारिणःस्थिरस्याप्यन
वरतंभ्रमतोनिर्म्मलस्यापिमलिनीकृताराातिवनितामुखकमलध्रतेरतिधवलस्यापिसर्वजनरागकारिणःस्थाप्तेरिवजलनि
धिः।उद्भवोयशसः।पातालवदाश्रितोनिजपक्षक्षितिभृतैःक्षितिभृत्कुलैःयदृगणस्वबुधायगतः।मकरध्वजस्वोत्सवविग्रहःदशर
थस्वसुमित्रोपेतःपशुपतिरिवमहासेनानुयातः।भुजगराजस्वकुमायगः।नर्म्मदाप्रवाहस्वमहावंशपल्लवः।अवतारस्वधर्मस्यप्रति
निधिरिवक्षत्रपोनमस्यराज्ञानारापीडोनामाभूत्।यस्मःस्वसरमलिनवज्ञपापावकज्जलेनकलिकालेनवालितमाभूत्ततोधर्म्मदशान
नेनेवकैलाशमिवपशुपतिरवष्टभ्यस्तुनरपिस्थिरीचकारयंचरतिप्रलापजनितदयार्द्रहृदयस्तृरनिर्म्मितमपरमकरकेतुममंमलोकः।।यं ३५

Digitized by Panjab Digital Library | www.panjabdigilib.org

जलनिधितरंगधौतमेखलात्प्रांतरविचारितारागणाह्वितगणितततरुतरुकुसुमभरकराडुड्डुदिंडविंदगलदमृतविंडडहिंमा इचंदनादशि
शिरकररथ्यडरंगखरशिखरोल्लेखखंडितोल्लसल्लवंगपल्लवाल्पैरावतकरलूनशल्लकीकवलाद्दाशैलाडुदयनाम्नः कपिवनविलुप्तविरल
लवलीलताफलाडुदधिनिर्गतिजलदेवतावंद्यमानराघवचरणादस्वलपातदलितशंखकुलशकलतारकितशिलातलात्तनलकरकरत
लकलितशैलसहस्रसंभृतादासेतुबंधात्त्राअह्नि निर्झरजलधौततारकामार्थादमृतमथनोद्धतवैकुंठकेयूरपत्रमकरकोटिकषणमसृणि
८८: तग्रावर्णे सुराद्धरहेलावलयितवासुकिसमाकर्षणारंभवालिचरणतरदलितनितंबात्स्रष्टतसीकरसिक्तसानोरामंदराचलात्तनरना
रायणचरणसुद्रांकितबदरिकाश्रमरमणीयात्तकुबेरसुरखंदरान्रवणरवसुरखरशिखरात्सप्तर्षिसंध्योपासनस्नूतप्रस्रवणांत्सोत्कोदरो
दलितसौगंधिकखंडसुगंधिमंडलादागंधमादनात्सेवांजलिकमलसुकुलदंतुरैः शिरोभिस्सुरगानरवमस्तवयथितसुकुटपत्रलताग्रंथयोल
ग्नचकितरलतारहशोसुजवलविजिताः प्रणोडरवनिपतयः येनचानेकरत्नांशुपल्लविनेमालं विशुकाफलजालकेदिग्गजेनेव कल्पतरा

Digitized by Panjab Digital Library | www.panjabdigilib.org

वाक्रांते सिंहासने ऽलसरणे शिलीमुखव्यतिकरकंपिता लताइव नेमुरायामिन्यः सर्वदिशः । यस्मैव मध्ये अनन्यसाधारणशक्तिसंपदे सुरपति
रपि स्पृहयांचकार । यस्माच्च धवलीकृतभुवनतलः सकललोकहृदयानंदकारी क्रौंचादिविहंगमनिवहो निर्जगाम गुणगणः । यस्य चाश्रुतामोदसु
रतिपरिमलया मंदरोद्धूतदुग्धसिंधुफेनलेखयेव धवलीकृतसुरासुरलोकया दशसु दिक्षु सुखरितभुवनमभ्राम्यत कीर्त्या यस्य चा ।
तिदुःसहप्रतापसंतापखिद्यमानेव तरुणमपि न मुमोचातपत्रच्छायां राजलक्ष्मीः । तथा च यस्य दिष्टवृद्धिमिव शुश्राव उपदेशमिव जग्राह मंगल
मिव बहुमेने मंत्रमिव जजाप आगमवचनमिव न विसस्मार चरितं जनो । यस्मिंश्च राजनि गिरीणां विपक्षता प्रत्ययानां परत्वं दर्पणानामभिमु
खावस्थानं शूलपाणिप्रतिमानां दुर्गाश्लेषः जलधराणां चापधारणं प्रतीहाराणामसिधारणं ध्वजानामुन्नतिर्धनुषामवनतिर्वंशानां शिलीमु
खहतं देवतानां यात्रा कुसुमानां बंधनस्थितिः इंद्रियाणां निग्रहः वनकरिणां वारिप्रवेशः तैक्ष्ण्यमसिधाराणां व्रतिनामसिधाराधारणं ग्रहाणां
तुलारोहणं अगस्त्योदये विषशुद्धिः केशनखानामायतिभंगः जलददिवसानां मलिनांबरत्वं रत्नोपलानां भेदः मुनीनां योगसाधनं कुमारस्क ३६

तिष्ठत्तारकोद्धरणं ग्रहस्य रश्मिग्रहणाशंका शशिनो ज्येष्ठातिक्रमः॥ महाभारते दुःशासनापराधाः कर्णनिर्दयः परिणामे दंडग्रहणं अभिपरि
वारेषु संधिच्छेदयमकौशलं योगो वकृता कामिनीनां कुचपत्रलतांगेषु करिणां दानविच्छित्तिः अक्षक्रीडासु शून्यगृहदर्शनं पृथिव्यामासीत्॥
तस्य च राज्ञो निखिलशास्त्रकलावगाहनगंभीरबुद्धिः शैशवादुपारूढनिर्भरप्रेमरसो नीतिशास्त्रप्रयोगकुशलो भुवनराज्यभारनौकाक
र्णधारः महत्स्वपि कार्यसंकटेष्वविषण्णधीः धाम धैर्यस्य स्थानं स्थितेः सेतुः सत्यस्य गुरुर्गुणानां आचार्य आचाराणां धाता धर्मस्य शेषाहिरि
व महीभारधारणक्षमः सलिलनिधिरिव महासत्वः जरासंध इव घटितसंधिविग्रहः॥ त्र्यंबक इव प्रसाधितदुर्गः युधिष्ठिर इव धर्मप्रभवः सक
लवेदवेदांगविदशेषराज्यमंगलैकसारो बृहस्पतिरिव सुनासीरस्य कविरिव वृषपर्वणः वशिष्ठ इव दशरथस्य विश्वामित्र इव रामस्य धौम्य इ
वाजातशत्रोः दमनक इव नलस्य सर्वकार्येषु हितमतिरमात्यो ब्राह्मणः शुकनासो नामासीत्॥ यो नरकासुरशस्त्रप्रहारलीघणोऽत्रमन्मंदरनितंब
निर्दयनिघर्षकठिनांसपीठेन नारायणवद्वक्षःस्थलेऽपि स्थितामक्षरलामममच्यतप्रज्ञाबलेन लक्ष्मीं यः समासाद्य दर्शितानेकराज्यफलालतेव

कादं: महापादपमनेकप्रतानगहनाविस्तारमुपाययौ यश्चायस्यानेकवारमनुभूतसहस्रसंचारविचित्तेवचतुरुदधिवलयपरिक्षेपप्रमाणे धरणि
३७ तलेसवनइवाविदितमहरहःसमुद्धभिन्नमपिराज्ञांनासीन्मसराज्ञावालपवसुरकुंजरकरपीवरेणराजलक्ष्मीलीलोपधानेनसकलज
गरलयप्रदानयज्ञदीक्षायूपेनस्फुरदसिलतामरीचिजालजटिलेननिखिलारातिकुलप्रलयधूमकेतुदंडेनबाहुनाविजितसमस्तद्वीप
वलयांवसुंधरांतस्मिन्दुष्टकनाशनाम्निमंत्रिणिसुवराज्यभारमारोप्यसुस्थिताःप्रजाःकृत्वाकर्तव्यशेषमपरमपश्यन्प्रशमिताशेषवि
पक्षतयाविगताशंकःशिथिलितपृथिवीव्यापारःप्रायोयौवनसुखान्यनुबभूव।तथाहि।कदाचिदुल्लसत्कठोरकपोलपुलकजर्जरितक
णपल्लवानांप्रणयिनीनांचंदनजलच्छटाभिरिवस्मितच्छटाभिर्विलिप्यमानः।कर्णोत्पलैरिवलोचनांशुभिस्ताड्यमानःकुंकुमवासमधू
लिलिभिरिवालरागप्रभाभिराकुलीक्रियमाणलोचनःधवलांशुकैरिवकरनखमयूखजालकैराहन्यमानश्चंपककुसुमदलमालिकाभि राम
रिवभुजलताभिरावध्यमानःदष्टाधररक्तकरतलचलन्मणिवलयकलकलरवरमणीयमतिरसमदलितदंतपत्रदलदंतुरितशयनसु ३७

Digitized by Panjab Digital Library | www.panjabdigilib.org

ह्रिमतचरणागलदलक्तकरसशेखरं सरतसकचयहृहृणितमणिकर्णपूरसुंतं तऊचचकस्मायुरुपंकपत्रलतांकितपत्रदपटमद्धश्रमजल
कणिकाक्षुलितरोचनातिलकपत्रलतं गं अनंगपरवशः सुरतमाततानकदाचिन्मकरकेतुकनकनाराचपरंपराभिरिवकामिनीकरसुरवि
निर्गताभिः कुंकुमजलधाराभिः पिंजरीक्रियमाणकायोलालाक्षाजललवरसप्रहारपाटलीकृतउरूलः स्तगमदजलशवलचंदनद्यामकांक्व
नकश्टंगकोशैः शिशिरं चिक्रीडा। कदाचित्कुचचंदनसूर्णधवलितोर्मिमालं चडुलडुलाकोटिवाचालचरणालक्तकमिलतहंसमिथुनं अलक
निपतितकुसुमसारस्नवमानकर्णशिरस्कुवलयदलं उन्नतनितंबक्षोभजर्जरिततरंगा। गद्दलितपद्मनालपर्यस्तनलिननिपातितबूलिपटर
लं अनवरतकरास्फालनस्फुरत्फेनपिंडचंडकितं सावरोधजनो जलक्रीडया दीर्घिकाणां मंतख्यकार। कदाचित्केतकचंचिताभिः घ्राण
यिताभिरावद्धतंगुरस्टकुटीभिरारूणितमणिमणिकंकणामुखरभुजलताभिर्वकुलकुसुमावलीभिः संयतचरणो नखकिरणविमिश्रैः कुसु
मदामभिः कृतापराधो विवशमताय्यत। कदाचिद्वकुलतरुरिवकामिनीगंडूषसीधुधाराद्वाद्दशुदितोविकाशमजनत। कदाचिद्‌अशोकपादप

Digitized by Panjab Digital Library | www.panjabdigilib.org

का॰ ३८

स्वभुवतिचरणतलप्रहारसंक्रांतालक्तकोरागश्रुवाहा।कदाचिन्मृशलापुष्पस्वचंदनधवलःकर्णावसक्तोन्नमल्लोलकुसुममालःपानमसे
वतकदाचिन्मृगचंडस्वमदरक्तकपोलदोलायमानकर्णपल्लवोमदकलःकाननंविकचवैनैलताकुसुमसुरभिपरिमलंजगाहे।कदाचितक्षोणि
तमणिनूपुरध्वनिनादानंदितमानसोहंसस्वकमलवनेषुरेमे।कदाचिन्मृगापतिरिवस्कंधावलंविकेसरमालःक्रीडापर्वतकेषुविचचारकदाचि
न्मधुकरस्वविहृतमाणाकुसुमसंकुलदंतुरेषुलतागृहेषुववाम।कदाचिन्नीलपटविरचितावगुंठनोवज्जुलनिशाप्रदोषदत्तसंकेताःसुंदरीर
भिससार।कदाचिद्विघटितकनककपाटप्रकटवातायनेष्वनवरतदह्यमानकृष्णागुरुधूमश्यामलैरिवपारापतैरध्यासितविटंकेषुमहाप्रा
सादकुक्षिषुकतिपयाप्तसुहृत्परिवृतोवीणावेणुमुरजमनोहरतममंतःपुरसंगीतकंददर्श।किंबहुनायद्यदतिरमणीयमभिमतमविद्
ह्वमायत्तंतदावेवतन्नदमाह्निमचेताःपरिसमाप्तत्वादन्येषांपृथिवीव्यापाराणांमिषेवेनतुष्टःसनितयाप्रमुदितप्रजस्यापिपरिसमाप्तसक
लमहाप्रयोजनस्यनरपतेर्विषमोपसोगलीलाश्रूषणमितरस्यतुविडंबनाप्रजानुरागाहेतोभ्रांतरादर्शनंददौ।सिंहासनंचनिमित्तेष्वारुरोह ३८

Digitized by Panjab Digital Library | www.panjabdigilib.org

शुकनाशोपि महांतं राज्यभारमनायासेनैव प्रज्ञाबलेन बभार। यथैव राजा सर्वकार्याण्यकार्षीत्तद्वत्सोऽपि द्विगुणीकृतप्रजानुरागः शुकेतमा
पिचलितचूडामणिमरीचिमंजरीजालिशिखालिखितावर्जितकुसुमशेखरच्छन्नमकलीकरसिक्तसंहरावनतिप्रेषितमणिकुंडलकोटिसंघटि
तांगदं राजकमानना मतस्मिन्नपि चलिते चलितचंडलउरगवलखुखरखररवबधिरीकृतखुदनाबलेन रप्रबलवसुधातलदोलायमानगिरि
योगलन्मंदोधांधगजदानधारांधकाराः संभ्रमपदातिवहलधूलिपटलप्रसरितसिंधवः प्रचलपदातिकलकलरवस्फोटितश्रवणाः सरससोह्य
घ्यमाणजयशब्दनिर्भराः प्रोह्यमानधवलचामरसहस्रसंबाधिताः जंजितनरेंद्रवृंदकनकदंडातपत्रसंघट्टनष्टदिवसा दशदिशोबभूवुः। एवं त
स्य राज्ञो मंत्रिविनिवेशितराज्यभारस्य यौवनसुखमनुभवतः कालो जगाम। भूयसा च कालेनाथैषाममयि जीवलोकसुखानां प्रायः सर्वेषामंतं ययौ
एकं तु तोकसुखदर्शनसुखं न लेभे। तथा संभुज्यमानमपि निष्फलमभूद्दर्शनं शरवणमिवांतःपुरमभूत्। यथा यथा च यौवनमतिचक्राम तथा
तथा विफलमनोरथस्यानपत्यताजन्मा महानवर्द्धतास्य संतापः विषयोपभोगसुखेभ्यो विमुखमनो विजातेन रपतिः सहस्रपरिवृत मथ सहायमि

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं वचश्रुत्वातमप्यंबरमिवशब्दमात्रालंबनमपिनिरालंबमिवात्मानममन्यत।अथचंद्रलेखेवहरजटाकलापस्यकौस्तुभप्रभेवकैटभारातेर्वक्षस्थल
३९ स्यवनमालेवहलायुधस्यवेलेवसागरस्यमदलेखेवदिग्गजस्यलतेवपादपस्यकुसुमोद्गतिरिवसुरभिमासस्यचंद्रिकेवचंद्रमसःकमलिनीवसर
सःतारापंक्तिरिवनभसःहंसमालेवमानसस्यचंदनवनराजिरिवमलयस्यफणामणिशिखेवशेषस्यभूषणमभूत्त्रिभुवनविस्मयजननीवं
निताविभ्रमाणांसकलांतःपुरप्रधानभूतामहिषीविलासवतीनाम।एकदाचतदावासगतस्तांचिंतास्तिमितदीनदृष्टिनाशोकमूकेनपरिजनेनप
रिवृतांआराद्धस्थितैश्चध्यानानिमिषलोचनैःकंचुकिभिरुपास्यमानांअनतिदूरवर्तिनीभिर्निःशब्दांतःपुरवृद्धाभिराश्वास्यमानांअविरलाश्रुबिंदुपा
ताडीकृतदुकूलांअनलंकृतांवामकरतलविनिहितमुखकमलांअसंयतालकजालकांनिविडपर्यंकिकोपविष्टांरुदतींददर्श।कृतप्रत्युत्थानांच
तांतस्यामेवपर्यंकिकायामुपवेश्यस्वयंचोपविश्यअविज्ञातवाष्पकारणोत्तानतीतस्वकरतलेनविगतवाष्पांबुकणौकृत्वकपोलौभूपालस्ताम
वादीत।देविकिमर्थमंतर्गतशोकभरमंथरमशब्दंरुद्यते।अश्रूणिहिमुक्ताफलजालकमिववाष्पबिंदुनिकरमेताश्चपक्ष्मपंक्तयःकिमर्थंचरु ३९

शोदरि नाकुलंतासि वालातपरक्वरक्कारविंदकोशयोरयं किमिति न पातितश्चरणयोरलक्तकरसः। कुसुमशरसरः कलहंसकौ कस्मात्त्यारपंक
जस्पर्शेन नानुगृहीतौ मणिनूपुरौ। किं निमित्तमयमपगतमेखलाकलापको मध्यभागः। किमिति च हरिणाङ्कवहरिणालांछनेन लिखितः कुच
युगुपत्रलतंगःपयोधरभारो। केन कारणेन न त्वयायं हरजटाखंडल इव गंगास्रोतसा न विभूषितो वा हारेण वरोरु शिरोधरः। किं सुभावहसि विला
सिनि श्रवदश्रुजललवधौतकुंकुमपत्रलतं कपोलयुगं दधाना कोमलांगुलिदलनिकरं रक्तोत्पलमिव करतलं किमिति कर्णपूरतामारोपितं श
मांचकेन हेतुनामा भिनिधारयस्यनुपरचितगोरोचनाविंदुतिलकामसंयमितालकिनीं ललाटरेखां। अयं च ते वकुलपल्लवप्रदोष इव चंद्रलेखा
विरहितः करोति मे दृष्टिखेदमतिवकुलतिमिरपटलांधकारः केशपाशः। प्रसीद निवेदय देवि किं स्वनिमित्तं पत्रहि पल्लवमिव सरागं मम हृदय
माकंपयति तरलीकृतस्तनांशुकांस्वयंतासि श्वासमरुतः। कच्चिन्मया परिद्धमत्येन वा केन चिदस्मद्गुरुजीविना परिजनेन। अति निपुणमपि
चिंतयन्नपश्यामि खलु स्खलितमन्यमथात्मनः स्वल्पविषये ख दायत्तं हि मे जीवितं च राज्यं च। कथ्यतां सुंदरि शुचः कारणमित्येवमभिधीयमाना

Digitized by Panjab Digital Library | www.panjabdigilib.org

कार॰ विलासवतीयदानकिंचिद्वक्ष्यतिवचःप्रतिपेदेतदाविदित्वाप्यहेतुमस्याःपरिजनमपृच्छदथतस्यास्तांबूलकरंकवाहिनीसततप्रत्यासन्नामक
५० रिकानामराजानमब्रवीद्देवजानेदेवादल्पमपिपरिस्खलितमपिकुर्वेचदेवेकाशक्तिःपरिजनस्याथस्यवाकस्यचिदपराधेकिंतुमहानयंहृद्य
स्येवविफलनरेंद्रसमागमास्मीतिश्रुत्यमस्यादेव्याःसंतापःसुमहांश्चकालःसंतप्यमानायाःप्रथममपिस्वामिनीदानवश्रीरिवसततनिंदित।
सुरता।शयनाशनस्नानभोजनभूषणपरिग्रहादिषुसमुचितेषुचदिवसव्यापारेषुकथंकथमपिपरिजनप्रयत्नात्प्रवर्तमानासशोकवा
सीत्।देवहृदयपीडापरिजिहीर्षयानदर्शितवतीविकारंअद्यतुचतुर्दशीतिभगवंतंमहाकालमर्चितुमितोगतयात्रमहाभारतेवाच्यमानेश्रु
तमपुत्राणांकिलनसंतिलोकाः।पुंनाम्नोनरकात्त्रायतइतिपुत्रस्तेतच्छुत्वाभवनमागत्यपरिजनेनसशिरःप्रणाममभ्यर्थ्यमानापिनाहा
रमभिनंदतिनभूषणपरिग्रहमाचरति।नोत्तरंप्रतिपद्यतेकेवलमविरलबाष्पदुर्दिनांधकारितमुखीरोदितिएवेतदाकर्ण्यदेवःप्रमाणमित्य ५०
भिधायविरराम।विरतवचनायांतस्यांभूमिपालस्तूष्णींमुहूर्तमिवस्थित्वादीर्घमुष्णंचनिःश्वस्यनिजगाददेविकिमत्रक्रियतांदैवायत्तेवस्तुनिमा

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्रमलं त्वदितेन नवयमत्वयात्व्याः प्रायो देवतानामात्मजपरिष्वंगामृतास्वादसुखस्पृहनमतो जनमम्माकं हृदयं अथ यस्मिन् जन्मनि न कृत
मवद्यातं कर्म्म जन्मांतरकृतं दिक कर्म्मफलमुपनयति प्रकृष्टस्येह जन्मनि न हि शक्यं दैवमन्यथा कर्तुमिति सुके नापि यावत्तमसुष्यकेशकामुप
पादयितुं तावत्सर्व्वमेवमुपपाद्यतां । अधिकाश्च रुदेवि गुरुषु लोके द्विगुणामुपपादय देवताशुश्रूषां जनपि जनमपर्युपदर्शितादरा लवपरं हि दैवत
मभ्युपायत्वेनाराधिता यथा समीहितफलानामतिदुर्ल्लभानामतिवराणां दातारो भवन्ति । श्रूयते हि चंडकौशिकप्रसादान्मगधेषु बृहद्रथो नाम
राजा जनार्द्दनस्य जेतारमतुलभुजबलमप्रतिरथं जरासंधं नाम तनयं लेभे । दशरथश्च राजा परिणतवया विभांडकमहामुनिसुतस्य ऋष्यशृं
गस्य प्रसादान्नारायणभुजानिवाप्रतिहतान्दश्वी निवाक्षोभ्यान् वापचतुरः सुतानवाप । अन्ये च राजर्षयस्तपोधनानाराध्य सुतदर्शनामृतास्वादसुख ।
भाजो बभूवुः । अमोघफला हि महामुनिसेवा भवंति । अहमपि खल्वु देवि कदा सुपात्र गर्भालसामापांडुमुखीमासन्नचंद्रोदयामिव पौर्णमा
सीं निशां देवीं द्रक्ष्यामि कदा मे तनयजन्ममहोत्सवानंदनिर्भरो हरिष्यति पूर्णपात्रं परिजनः कदा हारिद्रवसनधारिणी सुतसनाथोत्संगा देवी ।

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰ ४२ रिवोदितरविमंडलासवालतपामामानंदयिष्यति देवी कदा सर्वौषधिपिंजरजटिलके शोनिहितरक्षाघृतविडंबिताङ्गनिविन्यस्तगौरसर्ष
पोऽभिश्रभूतिलेखो गोरोचनातिलकं ठसूत्रग्रंथिउनानशयो दशनश्रूत्र्यस्मितानन: पुत्रको ज नयिष्यति मे हृदयाह्लादं कदा गोरोचनाक
पिलकृतिरंत:पुरिकाकरतलपरंपरासंचार्यमाणश्चिरशोपजनवंदितो मंगलप्रदीपइव मे शोकांधकारमुन्मूलयिष्यति चक्षुषो कदा च ।।
क्षितिरेणुधूसरो मंडयिष्यति मम हृदयेन दृष्ट्याच सह परिभ्रमन्नवनांगणं कदा केसरिकिशोरक इव संजातजानुचंक्रमणावष्टब्ध: संचरिष्यतीत
स्ततस्फटिकमणितिस्त्यंतरितात्नवनमृगकशावकान् जिघृक्षु: कदा उन्न:पुरनूपुररवनिनादसंगतान्गृहकलहंसकाननुसरन्कन्नांतरप्रभा।
वित:कनकमेखलाघंटिकारवानुसारिणीमायासयिष्यति धात्रीं कदा कृष्णागुरुपंकलिखितमदलेखालंकृतगंडस्थलको मुखडिंडिमध्वनिज।
नितप्रीतिरूर्द्ध्वकरविपकार्णचिंदनचूर्णधूलिधूसर:कंचितांगुलिशिखरांकुशाकर्षणाविकृतशिरा: करिष्यति मन्नराजलीलां कदा मातुरभर
णभूगंनरागोपभुक्तशेषेणपिंडालक्तकरसेन धवलकंबुकिनां विडंबयिष्यति सुखानि कदा कृतहलचंचललोचनो मणिकुट्टिमे पदपोदत्तदृष्टि ४२

Digitized by Panjab Digital Library | www.panjabdigilib.org

खमरिष्यति खलंकृतिरात्मनः प्रतिबिंबानि कदा नरेंद्रः सहर्षप्रसारितभुजयुगलालिंगनं ध्यमानागमनोऽश्वघ्रणमणिमयस्खलेखाकुल।
क्रियमाणलोलदृष्टिरास्थानस्थितस्य मेऽपरः पर्यटिष्यति सत्संतरेष्वित्येतान्निव मनोरथशतानि चिंतयंतोऽन्तः संतप्यमानस्ये प्रयांति रजन्यो।
ममा पि हि देवस्येवायमहर्निशमनलस्वानपत्यतासमुद्भवः शोकः। शून्यमिव मे प्रतिभाति जगदफलमिव पश्यामि राज्यमप्रतिविधेये तु।
विधातरि किं करोमि। तन्मुच्यतामयं देवि शोकानुबंधः॥ आधीयतां धैर्ये धर्मे च धीः। धर्मपरायणानां हि सदा समीपसंचारिण्यः कल्याणसंप
दो भवंतीत्येवमभिधाय सलिलमादाय स्वयं करतलेनासिनवपल्लवेनेव विकचकमलोपमानमाननमस्याः साश्रुलेखं ममार्ज पुनः पुन।
श्च प्रियशतमधुराभिः शोकापनोदनिपुणाभिर्धर्मोपदेशगर्भाभिर्वीभिराश्वास्य सुचिरं स्थित्वा नरेंद्रो निर्जगाम निर्गते च तस्मिंश्च मंदीभूतशो। म ३
कावेगा विलासवती यथाक्रियमाणमाभरणपरिग्रहादिकमुचितं दिवसव्यापारमन्वतिष्ठत्। ततः प्रभृति सुतरां देवताराधनेषु ब्राह्मणपू
जासु गुरुजनसपर्यासु चादरवती बभूव। यद्यच्च किंचित्कुतश्चितः शुश्राव गसतिह्नयातं तत्सर्वं चकार। अनमहांतमपि क्लेशमजीगणत्। अन

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं वरतदयमानगुगुलवहलधूमांधकारितेषुचंडिकाग्रहेषुधवलांवरधुचिशुद्धिरुपोषिताहरितकुशोपह्वदेषुशलशयनेसुसुष्वापसुए
५२ सलिलपूर्णैर्विविधकुसुमफलोपमैः।क्षीरतरुपल्लवलांछनैःसर्वरत्नगर्भैःशातकुंभकलशैर्गोकुलेषुवृद्धगोपवनिताकृतमंगलालक्षणासं
पन्नानांगवाममधःसस्नौ।प्रतिदिवसमुत्थायोत्थायसर्वरत्नोपेतानिहैमानितिलपात्राणिब्राह्मणेभ्योददौ।महानरेंद्रालिखितमंडलमध्यवर्तिनी
विविधवलिदानानंदितदिग्देवतानिवकुलपकुचतुर्दशीनिशासुचत्वरस्थ्यस्थस्नपनमंगलानिलेजेसिद्धायतनानिकृतविचित्रदेवतोपाधनरि
तकानिमिषवेददर्शितप्रत्यादेशानिसन्निधानमातृभवनानिजगामप्रसिद्धेषुनागकुलह्रदेषुममज्ज।अश्वत्थप्रभृतीनुपपादितपूजान्महावन
स्पतीन्कृतप्रदक्षिणाववंदेदोलायमानवलयेनपाणिपुटगलेनश्रातास्वयमखंडसिक्थसंपादितंरजतपात्रेपरिगृहीतंवायसेभ्योदध्योदनवलिमदा
त्।अपरिमितकुसुमधूपविलेपापिष्टतिलप्रयोजितमत्रंपललंपललपायसवलिलाजकलितामहरहर्दुर्गादेवीसपर्यामातनताना।स्वयमुपहृत। राम
पिंडपात्रान्नग्नक्षपणकानमननसाभिद्धादेशान्नमनपणकाचपद्यप्रविप्रश्चिकादेशवचनानिवक्रमेनेत्रिभिमित्तज्ञानुपचचार।शकुनज्ञानविदा। ५२

Digitized by Panjab Digital Library | www.panjabdigilib.org

मादरमदर्शयत्॥ अनेकवृद्धपरंपरागतानि रहस्यान्यंगीचकार॥ दर्शनीमतं द्विजजनमात्मजदर्शनोत्सुका वेदश्रुतीरकारयत्॥ अनवरतं वा
च्यमानाः पुण्यकथाः शुश्राव॥ गोरोचनालिखितभूर्जपत्रगर्भान्मंत्रगंडकानुवाह॥ रक्षाप्रतिसरोपेताश्चौषधीसूत्राणि बबंध॥ परिजनोपि चास्याः सततमु
पश्रुत्यै निर्जगाम॥ त[?]वीज्ञिभिन्ना निजग्राह॥ शिवाभ्यो मांसबलिपिंडाननुदिनं निशि समुत्ससर्ज॥ स्वप्नदर्शनार्याणापाचार्याणामाचचक्षे॥ चत्वरेषु
शिवबलिमुपजहार॥ एवं च गच्छति काले कदाचिद्राजा क्षीणभूयिष्ठायां रजन्यामल्पशेषपांडुतारके जरत्पारावतपक्षधूम्रे नभसि स्वप्ने सितप्रासाद
शिखरस्थितायाः विलासवत्याः करिण्या इव बिसपल्लवमानने सकलकलापरिपूर्णमंडलं शशिनं विशंतमद्राक्षीत्॥ प्रबुद्धश्चोत्थाय हर्षविकाशस्फ
ततरेण चक्षुषा धवलीकृतवासभवनस्तस्मिन्नेव क्षणे समाहूय शुकनासाय तं स्वप्नमकथयत्॥ स तं समुपजातहर्षः प्रत्युवाच॥ देव संपन्नाः सुचिरा
दस्माकं प्रजानां च मनोरथाः॥ कतिपयैरेवाहोभिरसंदेहमनुभवति स्वामी सुतमुखकमलावलोकनसुखमद्य खलु मयापि निशि स्वप्ने धौतसकलवा
ससा शांतमूर्तिना दिव्याकृतिना द्विजेन विकचधवलकलावदातदलशतमालोलकेसरसहस्रजालमकरंदबिंदुसीकरवर्षि पुंडरीकमुत्संगे देव्या

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं
४३
मनोरमायानिहितंदृष्टं।आवेदयंतिप्रत्यासन्नमानंदमग्रपातीनिशुभानिनिमित्तानिकिंचान्यत्प्रियतरमपरमधिकमानंदकारणमतो
नविद्यतेअवितथफलाश्चप्रायोनिशावसानसमयदृष्टाभवंतिस्वप्नाः।सर्वथाचिरेणमांधातारमिवधौरेयंसर्वराजर्षीणांभुवनानंदहेतु
मात्मजंजनयिष्यतिदेवी।शरत्कालकमलिनीवाभिनवकमलोद्गमेनगंधगजमाह्लादयिष्यतिदेवम्।येनेदंदिग्गजमदलेखेवाविछिन्ना
संतानाद्भितिलोकधारणेविना।नविद्यतेकुलसंततिः।स्वामिनस्त्वेवमभिदधानमेवतंकरेणगृहीत्वानरेंद्रःप्रविवेश।तस्यामपिरात्र्यांस्वप्नासं न रा॰१
विलासवतीमानंदयंश्चकार।कतिपयदिवसापगमेचदेवताप्रसादात्सरसीमिवप्रतिमाशशीविवेशगर्भेविलासवतीं।येननंदनवनराजिरि
वपारिजातेनमकरंदेनवल्लरीवकौस्तुभमणिनासुतरामराजत।दर्पणश्रीरिवचगतविलेनसंक्रांतमवनिपालप्रतिबिंबमुवाहसाशनैः
शनैश्चप्रतिदिनमुपचीयमानगर्भानिर्भरपरिपीतसागरसलिलभरमंथरेवमेघमालामंदमंदंसंचचार।मुहुर्मुहुरुज्जृंभमाणविजृंभितकमालिनि राम
तलोचनमालसंनिश्वासा।तथाबद्धाचनामहरहःस्वयमनेकरसवांछितपानभोजनांप्रारूपमिवश्यामायमानपयोधरमुखां।केतकीभिव ४३

गर्तछविपांडुरमालोक्येक्षितकुशलःपरिजनोविज्ञातवार्त्तः॥ अथतस्याःसर्वजनप्रधानस्त्रनासदाजारकुलसंचारचतुरा।सदावराजसन्निकर्ष
प्रगल्भासर्वमंगलकुशलाकुलवर्द्धनानाममहत्तरिकासाप्रशस्तेदिवसेप्रदोषवेलायामभ्यंतरास्थानमंडपगतंगंधतैलावसेकप्रज्वलितदीपिकासह
स्रपरिवारमुडुनिकरमध्यवर्त्तिनमिवपौर्णमासीशशिनंउरगराजफणामणिसहस्रांतरालस्थितमिवनारायणंमूर्द्धाभिषिक्तैःप्रधाननरेंद्रैःपरिमि
तैःपरिवृतमनतिदूरावस्थितपरिजनंअनंतरमुत्तुंगवेत्रासनोपविष्टेनधौतधवलांवरपरिधानेनदुग्धार्णववेषेणजलनिधिनेवासाध्यगांभीर्येणासमु
पारूढविश्रंभनिर्भराःशाश्वत्कथाःशुकनासेनसहकुर्वाणंभूमिपालमुपसृत्यरहःकर्णमूलेविदितंविलासवत्यागर्भवृत्तांतमकाथीत्। तेनचतस्या
वचनेनाकृतपूर्वेणासंभाव्येनाप्रतरसेनेवसिक्तोगात्रस्यसद्यःप्रहृष्टरोमांकुरनिकरकंटकिततनोरानंदरसेनविकलीक्रियमाणस्यस्मितविक
सितकपोलस्थलस्यपरिस्फुरितहृदयातिरिक्तहर्षमिवदशनांशुवितानच्छलेनविकिरतोराज्ञःशुकनासमुखेलोलतारकमानंदजलविंदुक्लिन्न
पक्ष्ममालंतत्क्षणंपपातचक्षुः।अनालोकितपूर्वमुत्तंहर्षप्रहर्षमतिसमीक्ष्यनृपतेःकुलवर्द्धनांचस्मितविकसितमुखीमागतांदृष्ट्वातस्यवार्थस्य।

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं सततंमनसिविपरिवर्तमानत्वादविदितस्वप्नांतोपितत्कालोवितथमपरिमितमतिमहतोहर्षस्यैककारणमपश्यच्छुकनाशः।प्रबुध्यचसेद्यसमुत्त
४४ त्थितासनःसमीपतरमुपसृत्यनातिप्रकाशमावत्ताघेदेवकिमद्यकिंचित्तस्मिन्नस्वप्नदर्शनेसत्यं।अत्यंतमुत्कुल्ललोचनाहिकुलवर्द्धनादृ
श्यतदेवस्यापीदंप्रियवचनश्रवणोत्कुतूहलादिवश्रवणस्थलउपसर्पड्परवयादिवनीलकुवलयकर्णपूरशोभमानंदजलपरिष्कृतंतरल
तारकंविकसदावेदयतिमहत्प्रहर्षकारणमीक्षणयुगलं।उपारूढमहोत्सवश्रवणकुतूहलमुत्सुकोत्कंठमिवमेमनःसदावेद
यतुदेवःकिमिदमित्युक्तवतितस्मिन्राजाविहस्याब्रवीत्।यदिममनयायथाकथितंतथासर्वमवितथंस्वप्नदर्शनं।अहंतुनश्रद्द
धेकुतोस्माकमियतीभाग्यसंपत्।अतोजनंहिवयमीदृशानांप्रियवचनश्रवणानामवितथवादिनामप्यहंकुलवर्द्धनामेवंविधानांकल्या
णानामसंभावितमात्मानमन्यमानोविपरीतामिवाद्यपश्यामि।तदनिष्टस्वप्नमेवगमताकिमत्रसत्यमितिदेवीपृच्छातास्यामीत्यभिधा
यविसर्ज्यसकलंनरेंद्रलोकंउत्सुच्यचस्वांगेस्योभूषणानिकुलवर्द्धनायैदत्वातया।दत्तप्रसादानंतरमवनितलाक्लिष्टललाटलेखया ४४

शिरःप्रणामेनाभ्यर्चितः सहस्तकनाशेनोद्धाय हर्षविशेषनिर्भरेण प्रेर्यमाणो मनसा पवनचलितनीलकुवलयदललीलाविडंबकेन द
क्षिणेनाक्ष्णा परिस्फुरताभिनंद्यमानः स्वकालसेवासूचितेन विरलविरलेन परिजनेनानुगम्यमानः पुरःसंसर्पिणीनामनिललोलस्थूल
शिखानां प्रदीपिकानामालोकेन समुत्सार्यमाणकक्षांतरतिमिरसंहतिरंतःपुरमयासीत् तत्र च कृतरक्षासंविधानेन नवसुधानुलेपधवलि
तेन प्रज्वलितमंगलप्रदीपेन पूर्णकलशाधिष्ठितद्वारपक्षकप्रत्यग्रलिखितमंगल्यालेख्योज्ज्वलभित्तिभागमनोहारिणा उपरचितसितवितानेन विता
नपर्यंतावबद्धशुक्लांशुकेमणिप्रदीपप्रहततिमिरेवासभवने निलिखितपत्रलताकृतरक्षापरिक्षेपं शयनशिरोभागविन्यस्तधवलनिद्रा
कलशं आबद्धविविधौषधिमूलमंत्रपवित्रं अवस्थापितरक्षाशक्तिवलयं शस्त्रतोविप्रकीर्णगौरसर्षपशवलं वितवालपोक्रग्रथितलोलपिच्छ
लपत्रं आसक्तहरितारिष्टपल्लवं भुजंगपादपीठप्रतिष्ठितमिंदुदीधितिधवलप्रच्छदपटमचलराजशिलातलविशालं गर्भोचितं शयनतलमधि
शयानां कनकपात्रपरिगृहीते रविविच्छिन्नविरलावस्थितदधिलवै जनितरंगतरलमितशालिभिः क्षनिकरैः ग्रथितकुसुमांजलिसनाथैः पूर्णसा

कादं ४५ जनैरखंडितानंतमत्स्यपललैश्चप्रत्यग्रपिशितपिंडमिश्रैरविछिन्नसलिलधारानुगम्यमानमार्गैःपटलकप्रछन्नैश्चशीतलप्रदीपैश्च
गोरोचनामिश्रगौरसर्षपैश्चसलिलांजलिभिश्चाचारकुशलेनांतःपुरजरतीजनेनक्रियमाणावतरणकमंगलांधवलांबरविविक्तवेषेण
प्रमुदितेनप्रसक्तमंगल्यप्रायालापेनपरिजनेनोपास्यमानामुपारूढगर्भतयागर्भनिकूलशैलामिवक्षितिंसलिलनिमग्नैरावतामिवमंदा
किनींगृहागतसिंहामिवगिरिराजमेखलांजलधरपटलांतरितदिनकरामिवदिवसश्रियंउदयगिरितिरोहितशशिमंडलामिवविभावरीं
अरुणप्रविष्टकमलविनिर्गमामिवनारायणनाभिंआसन्नागस्त्योदयामिवदक्षिणाशांफेनावृतामृतकलशामिवक्षीरोदवेलांगोरोचनाचित्रि
म२ तदर्शोपहतमतिधवलंदुकूलयुगलंवसानांविलासवतींददर्शससंभ्रमपरिजनप्रसारितकरतलावलंबनावष्टंभेनवामजानुविन्यस्तहस्तप
ल्लवांप्रचलितभूषणमणिरवमुखरमुत्तिष्ठंतींविलासवतीमलमलमत्यादरेणदेवितोद्वातव्यमित्यभिधायसहतयातस्मिन्नेवशयनीयेपार्थि
वःसमुपाविशत्।प्रमृष्टचामीकरचारुपट्टधवलोपच्छदेचासन्नेशयनांतरेशुकनासोप्युपाविशत्।अथतामुपारूढगर्भामालोक्यप्रहृष्टतरमंथरेणाम ४५

नसमाश्वासितपरिहासोराजादेविशुकनाशःपृच्छतियदाहकुलवर्द्धनाकिमपितत्किंतथैवेत्युवाच।अथाव्यक्तकम्पितस्फुरितकपोलाधरलोचना।
लज्जयादशनांशुजालकच्छलेनांशुकेनेवमुखमाच्छादयन्तीविलासवतीनक्षणमधोमुखीतस्थौ।पुनःपुनश्चानुबध्यमानाकिंनामातिमात्र
त्वयापरवशाकरोमिनाहंकिंचिदपिवेद्मीत्यभिदधानातिर्यक्चलिततारकेणचक्षुषावनतमुखीराजानंसासूयमिवापश्यत्।अपरिस्फु
टहासमज्योत्स्नाविशदेनमुखशशिनाभूभुजांपतिरेनांश्यावतापेखतउयदिमदीयेनवचसानतवश्रपावितच्छ्रुतो।तदयमहंस्थितोनिश्चितं।अ
स्यतुकिंप्रतिविधास्यसिविघटमानदलकोशविशदचंपककान्तेःसवर्णतयापरिमलाद्भिद्यमानस्यकुंकुमांगरागस्यपांडुरतामापाद्यमान
स्यस्तनयोर्गर्भसंस्तवाश्च्यावसेकनिर्वाप्यमानहृदयशोकानलप्रभवंधूममिवोद्वमतोराहरीतनीलोत्पलयोरिवचक्रवाकयोर्मालपल्लव।
लोहितमुखयोःशिखिकनककलशयोःसकृद्दिवालिखितकृष्णागुरुपंकपत्रलतयोःशोभामायमानस्तनकयोःपयोधरयोः।अस्यतुप्रतिदिनमतिगा
ढतरतामापद्यमानेनकांचीकलापेनहृष्यमानस्यत्रिवलिलेखावलयस्यकृशिमानमुपसर्पतोऽध्यलागस्पेत्येवंब्रुवाणामवनिपालमंतर्दुःखाविर

८१

दहासःशुकनाशोदेवकिमायासयसिदेवीं।इयमनयाकथयापिलज्जतेत्यजकुलवर्द्धनाकथितमवाप्तीसंवद्धमालापमपीताउद्धाता।एवंवि
धाभिश्चनर्मदायाभिःकथाभिःसुचिरंस्थित्वा।शुकनाशःस्वभवनमयासीत्।नरेंद्रोपितस्मिन्नेववासगृहेतयासहतांनिशामत्यवाहयत्।तत्रक्रमेण
यथासमीहितगर्भदोहदसंपादनपरितुष्टदितापूर्णेप्रसवसमयेपुण्येहनिअनवरतगलद्घटिकाकलितकालकलैर्बहिरहितध्यायैर्गणकैर्गृही
तेलग्नेप्रशस्तायांवेलायामिरम्मदमिवजलधरमालासकललोकहृदयानंदकारिणंविलासवतीसुतमसूत।तस्मिन्जातेससंभ्रममितस्ततःप्र
धावितस्यपरिजनस्यचरणशतसंक्षोभचलितक्षितितलोच्छृंखलप्रतिष्ठतसकलकृतिविकलकंचुकिसहस्रजनसंमर्दनिष्पिष्यमाणप
तितकुब्जवामनकिरातविघूर्णमानांतःपुरजनारणझंकारमनोहरःपणपात्रहरणविलुप्यमानवसनःक्षणःसंक्षोभितनगरोराजकुलेदि
ष्टिवृद्धिसंभ्रमोऽतिमहानभवत्।अनंतरंमंदरमथ्यमानजलनिधिघोषगंभीरडिंडिमनिनादप्रसरेणप्रहतमृदंगशंखकाहलानकनिवहनिर्न्ना
रेणमंगलपटहपटुरवसंवर्द्धितेनानेकजनसहस्रकलकलबहुलेनत्रिभुवनमापूरयतोत्सवकोलाहलेनसमासमंतात्संततःउरासप्रकृतयः

Digitized by Panjab Digital Library | www.panjabdigilib.org

सराजलोकाःसदेशःप्राप्तवतयःसबालवृद्धानन्तःपुरागोपालमुन्मत्ताइवहर्षनिर्भराःप्रजाःप्रतिदिनमवर्द्धतचंद्रोदयेनेवजलनिधिःकलकलमु
खरोराजसूनोर्जन्ममहोत्सवः॥पार्थिवस्तुतनयाननदर्शनोत्सवहृतहृदयोपि [illegible] दिवसवशेनमौहूर्तिकगणोपदिष्टेप्रशस्तेसुमुहूर्तेनिवारितनि
खिलपरिजनःशुकनाशद्वितीयोमणिमयमंगलकलशसुगलाशून्येनासक्तवज्रखचितिकालंकृतेनविविधवनपल्लवनिवहनिरंतरनिचितेन
संनिहितकनकमयमुशलयुगलेनविरलग्रथितकुसुमभित्रदूर्वाप्रवालमालालंकृतेनालंबितविरलव्याघ्रचर्म्मणावंदनमालांतरालघ
टितघंटागणेनद्वारदेशेनविराजमानंउभयतश्चद्वारपट्टकयोर्मर्यादानिपुणेनगोमयमयीभिरुन्नतानविनिहितवराटकप्रकारदंतुराभिरंतरान
रावकृतविविधवर्णरागरुचिरकर्पासकुसुमलेशलांछिताभिःकुंकुमकेसरलवाश्लेषलोहिताभिर्लेखाभिरालिखितस्वस्तिकपंक्तिजालमुपरि
रचितताहरिद्राद्रवविच्छुरणापरिपिंजराम्बरधारिणीभगवतीषष्ठीदेवींकुर्वताविकचपरुषकुटविकटशिखंडिपृष्ठमंडलाविरचितमालोललोहित
परघटितपताकसुक्ष्मसितवस्त्रक्रिदंतप्रचंडकार्त्तिकेयंसंघटस्पताविचित्रशालकुक्कुटपटलपाटलमध्यस्थतागोशीर्षचंदनमालावबद्धताकुंकुमपंकपिंज

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं
४७

रीकृताम्रर्द्धप्रोतकनकमयपवनिकरकंटकिनामविरललयगौरसिद्धार्थकप्रकरतयाकांचनरसखचितामिवस्मृन्मयपुत्रिकाकादंबमा
लांविन्यस्यताचंदनजलधवलितेषुभित्तिशिखरभागेषुपंचरागविचित्रचेलचीरकलापचिह्नांआपीतपिष्टपंकांकितवर्द्धमानपरंपरांअ
न्यानिचप्रसवगृहमंडनमंगलानिसंपादयतापुरंध्रिवर्गेणसमधिष्ठितांउपद्वारसंयतविविधगंधकुसुममालालंकृतजरत्तृणांअखिल
त्रीहिमध्याअवस्थापितार्धवृद्धाध्यासितशयनशिरोभागांअनवरतदह्यमानाउपमिश्रभुजगनिर्मोकमेषविषाणक्षोदंअनलधूप्यमाणा
रिष्टतरुपल्लवोल्लसितरक्षाधूमगंधंअध्ययनमुखरद्विजगणाविप्रकीर्यमाणशांत्युदककणंअलिनवलिखितजातमातृपटपूजाव्यग्रधा
त्रीजनंअनेकवृद्धांगनारब्धसूतिकामंगलगीतिकामनोहरंउपपाद्यमानस्वस्त्ययनंक्रियमाणशिशुरक्षाबलिविधानंआवध्यमानधवलकु
सुमदामशतंअविच्छिन्नपठ्यमाननारायणनामसहस्रंअमलहाटकयष्टिप्रतिष्ठापितैरहैः।भृतशतानावनिश्चलशिखैर्ध्यायद्भिर्मंगलप्रदी
पैरुद्भासितंअखाताभिन्नतामसनाथपाणिभिःसर्वतोरक्षापुरुषैःपरिवृतांसूतिकागृहमपश्यत्।अंतःपावकंचस्पृष्ट्वाविवेशचविशतश्च ।प्रसव।

राम
४७

परिक्षामपांडुमूर्त्रेरुत्संगगतं विलासवत्याः स्वप्रभासमुदयोपहतगर्भगृहप्रदीपकप्रभं। अपरित्यक्तगर्भरागत्वादुदयपरिपाटलमंडलमिव
सवितारं अपरसंध्यालोहितबिंबमिव चंद्रमसं अनुपजातकाठिन्यमिव कल्पतरुपल्लवं उत्फुल्लमिव रक्तारविंदराशिं अवनिदर्शनावतीर्णमि
वलोहितांगं विद्रुमकिशलयदलैरिव बालातपछेदैरिव पद्मरागमणिरश्मिभिरिव विरचितावयवं अनतिव्यक्तमुखपंचकमिव महासेनं सुरवनि
ताकरपरिभ्रष्टमिवामरकुमारं उन्नमत्कल्याणकांतिस्थिरतया स्वदेहप्रभया प्रारब्धमिव वासभवनमुद्भासमानैः सहजन्मभूषणैरिव महापु
रुषलक्षणैरुपेतं आगामिकालपालनप्ररूढया श्रिया समालिंगितं। आह्लादहेतुमात्मजं ददर्श। विगतनिमेषनिश्चलपक्ष्मणा च सुडंडुः पश्च
घसंधिहितानंदबाष्पपटलक्षततारकेण दूरविस्फारितेन स्निग्धेन चक्षुषा पिबन्निवालयन्निव स्पृशन्निव मनोरथसहस्रप्राप्तदर्शनं सस्पृहमी
क्षमाणो नयनानंदमुखदेहातकांतं चात्मानं मेने सम्पूर्णमनोरथः। शुकनासाक्ष्यशनैःशनैरंगप्रत्यंगान्यस्य निरूपयन्प्रीतिविस्फारितलोचनो भू
मिपालमवादीत्। देव पश्य पश्यास्य कुमारस्य गर्भसंपीडनवशादपरिस्फुटावयवशोभस्यापि माहात्म्यमाविर्भावयंति चक्रवर्तिचिह्नानि तथा

Digitized by Panjab Digital Library | www.panjabdigilib.org

कारेत्नु लाटवदेनवमालिन नालाभं कुः तत्नु तन्त्वयिपूर्णापरिस्फुरति एतद्धि कुचयुगलंडलीक धवलं
कर्णान्नापतं मुहुर्मुहुः २

कादं ४८ त्यस्य संध्यांशुरक्तबालशशिकलाकुटिलाभिषिक्तैरिव लयतीव वासलवनं अरालपक्ष्मलोचनयुगलं। विजृंभमाणकमलकोशपरिमलमनो
हरं इयमस्य सहजमानना मोदमाजिघ्रतीव दूरायत्तकनकलेखेव नासिका। रक्तोत्पलकलिकाकारमुद्वहतीव चास्याधररुचकं रक्तोत्पल
कलिकालोहिततलौ भगवतो विष्टरश्रवस इव शंखचक्रचिह्नौ प्रशस्तलेखयालांछितौ करौ। अभिनवकल्पतरुपल्लवकोमलं रेखामपेक्ष्य जि
रथतुरगातपत्रकमलैरलंकृतं अनेकनरेंद्रसहस्रचूडामणिचक्रचुंबनोचितं चरणयुगलं एष च दंडनेरिवातिगंभीरः स्वरयोगोऽस्य रुदितः।
श्रूयत इत्येवं कथयत्येव तस्मिन् ससंभ्रमापसृतेन राजलोकेन द्वारिस्थितेन दत्तमार्गस्त्वरितगतिरागत्य प्रहर्षोत्कंपपुलकिततनुः स्फारीभव
ल्लोचनो मंगलकनामा प्रहृष्टवदनः पुरुषः पादयोः प्रणम्य राजानं व्यजिज्ञपत्। देवदिष्ट्या वर्द्धसे प्रतिहताशेषशत्रुश्चिरंजीव। जय च पृथिवीं॥ राम
त्वत्प्रसादादस्य सवतः शुकनाशस्यापि ज्येष्ठायां ब्राह्मण्यां मनोरमाभिधानायां राम इव रेणुकायां तनयो जातः। श्रुत्वा देवः प्रमाणमिति। अथ ४८
नृपतिरमृतवृष्टिप्रतिममाकर्ण्य तद्वचनं प्रीतिविस्फारिताक्षः प्रत्यवदत् अहो कल्याणपरंपरा सत्योयं जनप्रवादो यद्विपद्विपदं संपत्संपदम

Digitized by Panjab Digital Library | www.panjabdigilib.org

उवप्रातीतिसर्वथासमानसुखदुःखयतांदर्शयताविधिनापिलवत्तेववयमनुवर्तिताइत्यभिधायप्रीतिविकसितनयनःस्मेरसमालिंग्य
विहस्यस्वयमेवशुकनाशस्योत्तरीयंप्रणयावंजहारतस्मैचप्रीतमनाःप्रियवचनश्रवणानुरूपंपुरुषायापरिमितंपारितोषिकमादिदेश॥
उत्थायचततश्चैवतेनचरणविक्षेपनक्वणितनूपुररसहस्रमुखरितदिगंतरेणासरससीतदपवलितमणिवलयावलीवाचालितभुजलतेनोद्धि
रूतैरुत्तानतलैःकरपुटैरनिलचलितामाकाशकमलिनीमिवदर्शयतापर्यस्तस्पृष्टदितकर्णपल्लवेनपरस्परांगादकोटिसंघट्टनपाटितोत्तरी
यांशुकेनश्रमजलधौतागरागरंजितस्वचीनवासमाकिंचिदवशिष्टतमालपत्रेणविलसद्धारविलासिनीहसितैरुन्निद्रकैरववनानुकारंप्रथ
यतासरलसवल्गनस्खलल्लोलहारलतास्फालितकुचस्थलेनसिंदूरतिलकलुलितालककलेखेनवि प्रकीर्णपिष्टातकपांशुपुंजपिंजरितके
शपाशेनप्रनृत्तकलम्बककुब्जकिरातवामनबधिरजडजनमुखरःस्मरेणोत्तरीयांशुकग्रीवावबद्धावकृष्टविडंबितजरत्कंचुकिकदंबकेनावीणावेणु
मुरजकांस्यतालानुगतेनकलमक्षरमुद्गायताहर्षनिर्भरतयामत्तेनेवोन्मत्तेनेवग्रहगृहीतेनेवव्यपगतवाच्यावाच्यविवेकेननृत्यत्क्रीडापस

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं ४८ क्रेणान्तःपुरिकाजनेन प्रचलमणिकुंडलाहतकपोलभित्तिना च विघूर्णमानकर्णोत्पलेनार्द्धविगलितविलोलशेखरेण दोलायमानवैकक्ष्य
कुंकुममालेन निर्दयप्रहतभेरीमृदंगमर्दलपटहनिनादानुगतकाहलाशंखखजनितरलसेन चरणसन्निपातैर्दारयतेव वसुधां राजपरिजने
न प्रवृत्तनृत्तेन चारणगणेन विविधमुखवाद्यकृतकोलाहलेन पठता गायता वल्गता चानुगम्यमानः शुकनाशतनयं गत्वा द्विगुणतरमुत्सव
मकारयत्। अतिक्रांते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये मुहूर्ते गाः सुवर्णं च कोटिशो ब्राह्मणसात्कृत्वा मातुरस्य मयापरिपूर्णमंडलश्चंद्रः सु
प्ते मुखकमलमाविशन्दृष्ट इति स्वप्नानुरूपमेव राजा सूनोः चंद्रापीड इति नाम चकार। अपरेद्युः शुकनाशोपि कृत्वा ब्राह्मणोचिताः सकलाः क्रि
म२ याः राजानुमतमात्मजस्य विप्रजनोचितं वैशंपायन इति नाम चक्रे। क्रमेण कृतचूडाकरणादिबालक्रियाकलापस्य शैशवमतिचक्राम चंद्रापीडस्य।
क्रीडाव्यासंगविघातार्थं बहिर्नगरादनुशिप्रं प्राकारमंडलेन परिहृतं अनुपाकारमाहितेन महता परिखावलयेन परिवेष्टितं अतिदृढकपाटसंपु
टं उद्घाटितैकद्वारप्रवेशं एकांतोपरचितनुरगवाह्यालीवितानमर्द्धक्रोशमात्रायाममतिमहत् तुहिनगिरिशिखरमालानुकारिणा सुधाधवलेन ४८

Digitized by Panjab Digital Library | www.panjabdigilib.org

सर्वविद्याचार्याश्रुक्रीडनव्यासंगर्ह

नगर्याचसंग्रहयेतत्क्षतिमहांतमर्वत्निद्धशताततत्रचंचवंतंकेसरिकिशोरकमिवपंजरगतंकृत्वाप्रतिषिद्धनिर्गमंमाचार्यकुलपुत्रप्रायपरिजन
परिवारमपनीताशेषशिशुधःकल्पितव्यायामशालंअमरच्छहोपमंविद्याश्रहमकारयत्तामर्द्धविद्याचार्याश्रुक्रीडनव्यासंगमनन्यमनसम्
स्थिलशाकारशिखरसमुदायेनसमुपेतमधःकल्पितव्यामशालममरच्छहोपमंविद्याश्रहमकारयत्।तत्रचंचवंतंकेसरिकिशोरमिवपंजरगं
तंकृत्वाप्रतिषिद्धनिर्गममाचार्यकुलपुत्रप्रायपरिजनपरिवारमपनीताशेषशिशुजनक्रीडंमनन्यमनसमविद्योपादानार्थमाचा लई
र्येभ्यश्चंद्रापीडंशोभनेदिवसेवैशंपायनद्वितीयमर्प्पयांबभूवप्रतिदिनंचोद्धायोद्धायसहविलासवत्याविरलपरिजनश्चेवगत्वेनमालोक
यामासराजा।चंद्रापीडोथनन्यहृदयतयातथानियंत्रितोराज्ञाऽचिरेणैवकालेनयथास्वमात्मकौशलंप्रकटयद्भिःपात्रवशादुपजातोत्साहै
गुणानोवसंपहेययममतिमहा तमन्वतिष्ठव् राचार्यैरुपदिश्यमानाःसर्वाविद्याजग्राह।मणिदर्पणइवातिनिर्मलेतस्मिन्संचक्रामसकलःकलाकलापः।तथाहिपदेवाक्येप्रमाणेधर्म्म
शास्त्रेराजनीतिषुव्यायामविद्यासुचापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषुसर्वेष्वायुधविशेषेषुरथचर्यासुगजपृष्ठेषुतुरंगमे

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰
५०

षुवीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषुवाद्येषुभरतादिप्रणीतेषुनारदीयप्रभृतिषुगांधर्ववेदविशेषेषुहस्तिशिक्षायांतुरगवयो
ज्ञानेषुपुरुषलक्षणेषुचित्रकर्मणिपत्रच्छेद्येपुस्तकव्यापारेलेख्यकर्मणिसर्वासुद्यूतकलासुगंधशास्त्रेषुशकुनिरुतज्ञानेग्रहगणितेरत्नपरी
क्षासुदारुकर्मणिदंतव्यापारेवास्तुविद्यासुआयुर्वेदेयंत्रप्रयोगेविषापहरणेसुरंगोपभेदेतरणेलंघनप्लुतिषुआरोहणेरतितंत्रेइंद्र
जालेकथासुनाटकेष्वाख्यायिकासुकाव्येषुमहाभारतपुराणेतिहासरामायणेषुसर्वलिपिषुसर्वदेशभाषासुसर्वसंज्ञासुसर्वशिल्पेषुछंद
स्वन्येष्वपिकलाविशेषेषुपरंकौशलमवापसहजाचास्यश्रममसावसतोवृकोदरस्येवशैशवएवाविर्भूतसर्वलोकविस्मयजननीमहाप्राण
तायदृच्छयाक्रीडताप्यनेनकरतलांचितकर्णपल्लवावनतांगाःसिंहकिशोरकाक्रमाक्रांताइवगजकलभकाश्चलितुमपिनशेकुः।एकैकेनकृ
पाणप्रहारेणबालएवताललतरून्रुपणालदंडानिवचकर्त्तावसकलराजन्यवंशवनदावानलस्यपरशुरामस्येवास्यनाराचाःशिखरिशिलातलानभि ५०
दोवष्टंभः।दशपुरुषसंवाहनयोग्येनचायोदंडेनश्रममकरोत्।ऋतेचमहाप्राणतायाःसर्वविद्याभिरन्याभिःकलाभिरलंचकारतंवैशंपायनः॥

चंद्रापीडस्य तु सकलकलाकलापपरिचयवर्द्धमानेन शुकनाशगौरवेण सह पांसुक्रीडनतया सहसंवर्द्धिततया च सर्वविश्रंभस्थानं द्वितीय-
मिव हृदयं वैशंपायनः परं मित्रमासीत् निमेषमपि तेन विना स्थातुमेकाकी न शशाक वैशंपायनोपि तमुष्णकरमिव वासरोऽनुगच्छन् क्षणम-
पि विरहयांचकार। एवं तस्य सर्वविद्यापरिचयमाचरत एव चंद्रापीडस्य त्रिभुवनविलोचनीयोऽमृतरस इव सागरस्य सकललोकहृदयनयनानं-
दजननश्चंद्रोदय इव प्रदोषस्य नवकुविभ्रवरागविकारभंगुरः सुरचापः कलाप इव जलधरसमयस्य मकरध्वजास्त्रभूतः कुसुमप्रसव इव कल्प-
पादपस्याभिव्यज्यमानरागो रमणीयः सूर्योदय इव कमलवनस्य विविधविलासयोग्यः कलाप इव शिखंडिनो यौवनारंभः प्रादुर्बभूव रमणी-
यस्यापि गुणगौरमणीयतां उपोपलब्धावसरो नवसेवक इव निकटीबभूवास्य मन्मथः लक्ष्म्या सह विस्तारमवाप वक्षःस्थलं बंधुजनमनोरथैः सहापूर-
यतोरुदंडद्वयं अरिजनेन सह तनिमानमभजत मध्यभागः त्यागेन सह प्रथिमानमाततान नितंबभागः प्रतापेन सहारुरोह रोमराजिः अहि-
तकलत्रालकलताभिः सह प्रलंबतामुपययौ भुजयुगलं चरितेन सह धवलतामभजत लोचनयुगलं आज्ञया सह गुरुर्बभूव भुजशिखरदेशः

Digitized by Panjab Digital Library | www.panjabdigilib.org

कादं॰ स्वरेणमहतालीलयातामाजगामहृदयं।एवंचक्रमेणसमारूढयौवनारंभंपरिसमाप्तसकलकलाविज्ञानंअधीताशेषविद्यंचावगम्यानुमोदि
५८ तमाचार्यैश्चंद्रापीडमानेतुंराजाबलाधिकृतंबलाहकनामानमाहूयबहुतुरगबलपदातिपरिवृतम॑तिप्रशस्तेऽहनिप्राहिणोत्।सगत्वा
विद्यागृहंद्वास्थैःसमावेदितःप्रविश्यक्षितितलविलंबितेन॑डामणिनाशिरसाप्रणम्याह्वअभिमतस्थितेराजसमीपएवसविनयमासनेरा
जपुत्रानुमतोपविष्टःस्थित्वाचमुहूर्तमात्रंबलाहकश्चंद्रापीडमुपसृत्यप्रदर्शितविनयोव्यजिज्ञपत्कुमारमहाराजःसमाज्ञापयतिपूर्णानोम
नोरथाःअधीतानिशास्त्राणिशिक्षिताःसकलाःकलाःगतोसिसर्वास्वासुविद्यासुपरांप्रतिष्ठांअनुमतोसिनिर्गमायविद्यागृहादाचार्यैरुप
गृहीतशिक्षंगंधगजकुमारकमिववारिबंधाद्विनिर्गतंअधिगतसकलकलापंपौर्णमासीशशिनमिवोदितंपश्यंतुत्वांजनाबध्नंतुसफलतां।
यांतुचिरदर्शनोत्कंठितानिलोकलोचनानिदर्शनंप्रतितेसमुत्सुकान्यतीवसर्वान्तःपुराणि।अयमद्यभवतोदशमोवत्सरोविद्यागृहमधिवस। ५८
तःप्रविष्टोसिषष्ठमनुभवन्वर्षमेवंसंपिंडितेनाधुनाषोडशेनप्रवर्द्धसेतदद्यप्रभृतिनिर्गत्यदर्शनोत्सुकाभ्योदत्वादर्शनमखिलाभ्योमातृभ्यः

Digitized by Panjab Digital Library | www.panjabdigilib.org

अनिवाह्यत्वमुपगतनियंत्रणोयथासुखमनुभवराज्यसुखानिनवयौवनललितानिचासम्मानयराजलोकं।जयद्विजातीन्परिपालयप्रजाः
आनंदयबंधुवर्गं।अयंचतेत्रिभुवनैकरत्नमनिलगरुडसमजवइंद्रायुधनामातुरंगमःप्रेषितोमहाराजेनद्वारितिष्ठति।एषखलुदेवस्यपारसीका
धिपतिनाआश्चर्यमितिकृत्वाजलनिधिजलादुत्थितमयोनिजमिदमश्वरत्नमासादितंमयामहाराजाधिरोहणयोग्यमिदमितिसंदिश्यप्रहितोदृष्ट्वानिवे
दितंचलक्षणविद्भिर्देवयादृशैःअश्वसःश्रूयंतेलक्षणानितैरयमुपेतोनैवंविधोभूतोभावीवातुरंगमइतितदयमनुगृह्यतामधिरोहणेनारदंचमू
र्द्धाभिषिक्तपार्थिवकुलप्रसूतानांविनयोपपन्नानांशूराणां।मनस्विनांकलावतांस्वकुलक्रमागतानांराजपुत्राणांसहस्रंपरिचारार्थमनुप्रेषितं
तुरंगमाधिरूढंद्वारिस्थाणामलालसंप्रतिपालयतीत्यभिधायविरतवचसिबलाहकेचंद्रापीडोऽपितुराज्ञांशिरसिकृत्वानवजलधरध्वानगंभीरयागि
राप्रवेश्यतामिंद्रायुधइतिनिर्जिगमिषुरादिदेश।अथवचनानंतरमेवप्रवेशितमुभयतःखलीनकनककटकावलग्नाभ्यांपदेपदेकृततांडवनम्र
यत्नाभ्यांपुरुषाभ्यामवकृष्यमाणमतिप्रमाणमूर्ध्वकरउरुघषाप्यष्टहस्तागंआपिबंतमिवसंमुखागतमखिलमाकाशंअतिनिष्ठुरेणघुर्घुरुःपूर्वकं।

कादं पित्तोदररंध्रेणाहेषारवेणापूरितभुवनोदरविवरेण निर्गत्स्यंतमिव लोके वेगाडविंदग्वंगाकृमंतं। अतिदूरमवनमता प्रतिक्षणमतिदूरमुन्नमता च
५२ जवनिरोधस्फीतरोषघुरघुरायमाणघोरघोणेन शिरोभागेन निजजवदर्पवशाज्जलंघनार्थमाकलयंतमिव त्रिभुवनं। असितपीतहरितपाटला
भिराखंडलचापानुकारिणीभिर्लेखाभिः कल्माषितशरीरं आस्तीर्णविचित्रवर्णकंबलमिव कुंजरकलभं कैलासतटाघातरक्तधातुधूलिपाटलमिव
हरवृषभं असुररुधिरपंकलेखालोहितसटमिव पार्वतीसिंहं संघातमिव मूर्तिमंतं अनवरतपरिस्फुरत्प्रोथपुटोत्फुल्लफूत्कारेणातिजवापीतमनि
लमिव नासिकाविवरेणोद्वमंतं। अनःस्खलितसुखरखलीनखरशिखरक्षोभजन्मनो लालाजलबुद्बुदः फेनपल्लवानुदधिनिवासपरिपीतामृतरस
गंडूषानिवोद्गिरंतमत्यायतेन। अतिनिर्मांसतया समुत्कीर्णमिव वदनमुद्वहंतं। आननमंडलनिहितारुणमणिसमुद्भूतैरंशुकलापैरुपेतेनावसक्तर राम
क्तचामरेणेव निश्चलशिखरेण कर्णयुगलेन विराजमानं। उज्वलकनकशृंखलारचितरश्मिकलापकलितया लाक्षालोहितलम्बलोलसटासंतान ५२
तयाजलनिधिसंचरणलग्नविद्रुमपल्लवयेव शिरोधरयोपशोभितं। अतिकुटिलकनकपत्रलताप्रतानबंधुरेण पदेपदेरणितरत्नमालेन स्थूलमुक्ताफ

Digitized by Panjab Digital Library | www.panjabdigilib.org

लम्बायेरावतागमणेनेव संध्यारागमरुणेनाभ्रालंकारेणालंकृतां स्वभ्रालंकारनिहितमरकतरत्नछायया मायमानेदेहतयाश्मगगनतलनिपतितदि
वसकररथतुरगशंकामिवोपजनयंतंअतितेजस्वितयाजदनिरोधदोमवशाद्यतिरोमकूपस्तुकृतानिसागरपरिचयलग्नानिमुक्ताफलानीवस्वेदलव
जालकानिवर्षंतंइंद्रनीलमणिपादपीठाउकाशिशिरंजनशिलायदितैरिवानवरपतनोत्पतनजनितविषमखरखुरखरवैःप्रष्टालिःखुरखुदैर्जर्जरितां
वसुंधरैर्उरजवाध्यमिवात्यस्यंतंउक्तीर्णमिवजंघास्तुविस्तारितमिवोरसिस्त्रवालीकृतमिवसुखे प्रसारितमिवकंधरायांउल्लिखितमिवपार्श्वयोद्विगु
णीकृतमिवजघनभागेनवप्रतिपन्नमिवमरुत्मतस्त्रैलोक्यसंचरणसहायमिवमारुतस्यस्पर्धाशावतारमिवोच्चैःश्रवसःवेगसब्रह्मचारिणमिवमनसः
हरिचरणमिवसकलवसुंधरोल्लंघनक्षमंवरुणहंसमिवमानसप्रचारक्षमम्मासदिवसमिवविकसिताशोकपाटलाभ्रंतिनमिवलम्मम् मधपछुंडकांकि
तसुवर्णकमलवनमिवमकरंदपंकपिंगकेसरंग्रीष्मदिवसमिवमहायामंभुजंगमिवसदागत्यभिमुखंउदधिपुलिनमिवशंखमालिकालंकृतांगीतमि
वसंबंधकरणंविद्याधरराज्यमिवचक्रवर्तिनिरवाहनमोचितंसूर्योदयमिवसकलभुवनार्थिहिंअथातिशयमिंद्रायुधमद्राक्षीत्दृष्ट्वाचतस्यहृदयेबभूवमा

Digitized by Panjab Digital Library | www.panjabdigilib.org

का॰दं घलोकोविस्मिताकारमखिलत्रिभुवनराज्योचितमशेषलक्षणोपपन्नमश्वरत्नमतिशयमतिधीरप्रकृतेरपिचंद्रापीडस्यपश्यतोविस्मयोहृदयं।आसी
५३ च्चास्यमनसिसकलसुरासुरविवर्तननिर्दलितवासुकिभ्रमितमंदरेणमथ्नताजलनिधिनेदमश्वरत्नमनभ्युद्धृतंता किंनामरत्नमुद्धृतंसुरासुरलोकेन।
५३ अनारोहताचमेरुशिलातलविशालमस्यपृष्ठमाखंडलेनकिमासादितंत्रैलोक्यराज्यफलं।अहोबतविस्मितहृदयोवंचितःखलुजलनिधिनाशत
मखः।मन्येचभगवतोनारायणस्यचक्षुर्गोचरमियताकालेननायमुपगतो।येनाद्यापितांगरुडारोहणव्यसनितांनपरित्यजति।अहोखल्वतिशा
यितत्रिदशराजसमृद्धिरियंतातस्यराज्यलक्ष्म्याः।यदेवंविधान्यपिसकलत्रिभुवनदुर्लभानिरत्नान्युपकरणतामागच्छंति।अतितेजस्वितयामहाशाप्या
तयाचसदेवतेवेयमस्याकृतिःशंकितमस्यमारोहणेशंकामिवमेजनयति।नहिसामान्यवाजिनामस्मात्घलोकोचितासकलत्रिभुवनविस्मयजननीयंदृ
श्यतेवंतयाकृतयदेवताअपिहिमुनिशापवशात्क्षिप्तनिजशरीरकाःशापवचनोपनीतानिशरीराणितानिअध्यासतएवश्रूयंतेहि।पुरास्थूलशिरा ५३
नाममहातपामुनिरखिलत्रिभुवनललामभूतामप्सरसंरंभाभिधानांशशापसाचसुरलोकमपहायाश्वहृदयेनिवेशात्मानमश्वहृदयेतिविख्याताव

Digitized by Panjab Digital Library | www.panjabdigilib.org

उदवास्तित्रिकावृत्यांशतकृत्वा तं नामराजानमुपसेवमानामर्त्यलोके महांतं कालमुषवास अथ्यैष महात्मा नो मुनिजनशापपरिपीतप्रतापो नानाक
रेष्टत्वावश्रउरिमिलोकां असंशयमनेनापि महात्मना केनापि शापपताजातवितव्यं आवेदयतीव मदंतःकरणमस्य दिव्यतां इति विचिंतयन्नेवा
रुरुक्षुरासनाउदतिष्ठच्च मनसा च तं तुरंगमम् उपसृत्य महात्मन्नवश्योसि सोसि नमोस्तु ते सर्वदा स्थितेन मर्षणीयोयमारोहणातिक्रमोस्मा
कं अपरिगितानि दैवतान्यप्यनुचितपरिभवलांजितवंतीत्यामंत्रयांबभूव विदिताभिप्रायश्च उत मिंद्रायुधमश्रुदुलशिरकेसरसदाहतिकूणिता
कोकरतारकेणतिर्यक्किंचिदृष्टा विलोकयन्मुहुर्मुहुरास्फाडयता क्षितितलमुखावदनविनिःसरितक्रोडरोमराजिना दक्षिणखुरेणारोहणायाह्वायन्निस्फु
